Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीजिनदत्तसूरिप्राचीनपुस्तकोद्धारफण्डे ग्रन्थाङ्कः ३६

सकलभट्टारकपुरन्दरसंविग्नचूडामणियुगप्रधानाचार्यवर्यश्रीमज्जिनचन्द्रसूरिशेखरसाम्राज्यवर्तीवाचनाचार्यश्रीमत्प्रमोदमाणिक्य-
वाचंयमविनेयावतंसश्रीमदकब्बरसाहिसंसल्लब्धजयमहोपाध्यायश्रीजयसोमगणिवरविनिर्मिता स्वोपज्ञवृत्तिविभूषिता प्रखरा-
त्मजनिन्हवानन्दपूर्वजोत्सूत्रभाषकशिरोमणिधर्मसागरीयेर्यापथिकीषट्त्रिंशिकायाः प्रत्युत्तररूपा

# ईर्यापथिकीषट्त्रिंशिका.

प्रकाशक–श्रीजिनदत्तसूरिज्ञानभाण्डागारस्य कार्यवाहकः पानाचन्द्र भगुभाइ झवेरी, गोपीपुरा–सुरत.

मुद्रक–नारायणराव लक्ष्मणराव नोकम, श्री 'शङ्कर' प्रिन्टींग प्रेस, चौटाब्रीज टांकी पासे–सुरत.

वीर संवत् २४५९ विक्रम संवत् १९८९ मूल्य १–८–०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# પ્રસ્તાવના.

સજ્જનો ! "**सामाइयं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च**(આવશ્યકસૂત્ર)**करेमि भंते !०**(પૂરી)**पच्छा इरियावहियाए पडिक्कमइ**"(ટીકા) "**अपडिक्कंताए इरियावहियाए न कप्पइ चेव काउं किंचिवि चिइवंदणसज्झायझाणाइअं**" ( **महानिशीथसूत्र** )

દુહા—પાપ તજી પછી ઈરિયાવહિએ, શુદ્ધિ સામાયિકે જાણુ । સૂત્ર ચૂર્ણિ ટીકાદિમાં પછી, સજ્ઝાય ચૈત્ય વંદન ધ્યાન ।૧। સામાયિકધારી પાપ ન તજી, કરે ઈરિયાવહિએ શુદ્ધિ જેહ । તે છોડિ ઇચ્છિત પાપ કરે, ન શુદ્ધિ ન સામાયિક તેહ ।૨। "**देवड्ढिखमासमणं जा, परंपरा भावओ वियाणेमि । सिढिलायारे ठविया, दव्वेण परंपरा बहुहा ।१।**" આગમઅષ્ટોત્તરિમાં શ્રીઅભયદેવસૂરિજી કહે છે કે શ્રીવીર મોક્ષ પછી એક હજાર વર્ષે શ્રીદેવર્દ્ધિગણિ ક્ષમાશ્રમણજી સુધી ભાવ પરંપરા જાણું છું. બાદ ઘણા પ્રકારે શિથિલાચારમાં સ્થાપિત દ્રવ્ય પરંપરા–દ્રવ્ય વેષધારી યતિઓ જિન ચૈત્યવાસી થયા, ત્યાંથી ચતુર્વિધસંઘમાં સમાચારિના ભેદો પાડ્યા તેનું ખંડન સંબોધ પ્રકરણમાં શ્રીહરિભદ્રસૂરિજીએ કર્યું તેમાં એટલા સુધી લખ્યું છે કે– "**एक्को साहू एक्का, वि साहुणी सावओ य सड्ढी य । आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ।१।**" અર્થ–એક સાધુ એક સાધ્વી એક શ્રાવક એક શ્રાવિકા પણ જે જિન આગમ આણા યુક્ત તે સંઘ છે, અને બાકી અસ્થિસંઘાત (હાડકાનો સમુદાય) છે। એ રીતે જેમ શ્રીહરિભદ્રસૂરિજીએ તેમ અનુક્રમે શ્રીઉદ્યોતનસૂરિજીના પાટે શ્રીવર્દ્ધમાનસૂરિજી ચૈત્યવાસી વિજેતા શ્રીજિનેશ્વરસૂરિજી શ્રીઅભયદેવસૂરિજી શ્રીજિનવલ્લભસૂરિજી શ્રીજિનદત્તસૂરિજી શ્રીજિનપતિસૂરિજી આદિએ સિદ્ધાંત વિરુદ્ધ ચૈત્યવાસી યતિયોની નવી નવી સમાચારિનું ખંડન સંઘપટ્ટક–ઉત્સૂત્રપદોદ્ઘાટનકુલકાદિ ગ્રંથોમાં કરેલું, તે દેખી બીજાએ અને ધર્મસાગરે દ્વેષથી ઔષ્ટ્રિકમતોત્સૂત્રકુલક અને પહેલાં શુદ્ધિ પછી મળ પાપ પંક ત્યાગ જેવી ઈર્યાપથિકીષટ્ત્રિંશિકા આદિ ગ્રંથો કરેલાં, તે આ જમાનામાં "ખરાત્મજાનાં નિન્હવત્વસ્થાપનાવાદ" ઈત્યાદ લખનાર પ્રખરીયાત્મજાનંદેજ છપાવી પ્રસિદ્ધ કરાવેલાં તેના ઉત્તરરૂપ તેજ સમયે કરેલાં ધર્મસાગરીય ઉત્સૂત્રખંડન–ખરતરગચ્છના શ્રીજયસોમજીકૃત ઈર્યાપથિકીષટ્ત્રિંશિકા એ પ્રાચીન ગ્રંથો છપાવી પ્રસિદ્ધ કરાવેલાં છે, તે વાંચી સાંભળી ૪૫ આગમ પંચાંગી આદિ પ્રાચીન સિદ્ધાંત મંતવ્યથી જે મળતું હોય તે સત્ય મંજૂર કરવું, ન બને તો વિપરીત થવું નહીં એજ વ્યાજબી છે ઇતિ શમ્ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकलभट्टारकपुरन्दरसंविग्नचूडामणियुगप्रधानाचार्यवर्यश्रीमज्जिनचन्द्रसूरिशेखरसाम्राज्यवर्तीवाचनाचार्यश्रीमत्प्रमोदमाणिक्यवाचंयमविनेयावतंसश्रीमदकब्बरसाहिसंसल्लब्धजयमहोपाध्यायश्रीजयसोमगणिवरविनिर्मिता स्वोपज्ञवृत्तिविभूषिता प्रखरिकात्मजनिन्हवानन्दपूर्वजोत्सूत्रभाषकशिरोमणिधर्मसागरीयेर्यापथिकीषट्त्रिंशिकायाः प्रत्युत्तररूपा

# ईर्यापथिकीषट्त्रिंशिका.

जैनचन्द्रं वचः स्मृत्वा, ध्यात्वा श्रीश्रुतदेवतां। षट्त्रिंशिकामिहेर्यायाः, विवृणोमि समासतः॥ १॥

इह हि तावदेवाभिमतप्रकरणसमयाव्यवहितपूर्वसमये समयानुसारेण समभिधेयप्रयोजनं संबंधादिनिवेदनपुरस्सरं निर्विघ्नशास्त्रसमाप्तिप्राप्तये शिष्यानुशिक्षायै च समुचितेष्टदेवतानमस्काररूपं वाचिकं मङ्गलं निरूपयन्प्रथमां गाथामाह—

**पणमिय पासजिणिंदं, जणिआणंदं जणाण पणयाणं। इरियावहियवियारं, वुच्छं सुगुरूवएसेणं॥१॥**

व्याख्या—'संहितादिक्रमेणैव व्याख्यान'मिति शिष्टजनसङ्केतात्संहितापदयोः सूपपाद्यत्वात्तेऽपहाय पदार्थांन्याह—पार्श्वजिनेन्द्रं प्रणम्येर्यापथिकाविचारं वक्ष्ये इति सम्बन्धः, पार्श्वश्चासौ जिनेन्द्रश्च पार्श्वजिनेन्द्रस्तं पार्श्वजिनेन्द्रं, श्रीवर्द्धमानजिनस्यासन्नोपकारकस्य सत्वेऽपि श्रीमत्परमगुरुनवाङ्गविवरणकरणप्रवणश्रीमदभयदेवाचार्याणामासन्नतरोपकारकत्वेनास्माकं सुतरामुपकारित्वात्पार्श्वनाथस्यैवेष्टदेवत्वेनात्र पुर-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्कारः, पुरुषादेयत्वात्सप्रातिहार्यत्वाद्वा तन्नमस्करणमुचितमेव, अथ लोकोपकारकत्वज्ञापकविशेषणेन तमेव विशिनष्टि, किम्भूतं ? 'जनितानन्दं' जनित आनन्दो येन स जनितानन्दस्तं, केषां ? 'प्रणतानां' मनोवाक्कायैः प्रह्वीभूतानां'जनानां'लोकानां, प्रणमतानामानन्दसम्पादकत्वेन समर्थत्वं तस्य समर्थितं तथा तेनैव शास्त्रादौ विघ्नविनाशाय समीप्सितसम्पादनाय च समुपादेयत्वं तस्य प्रशंसितं, ईरणमीर्या—गमनमित्यर्थः, तत्प्रधानः पन्था ईर्यापथः, तत्र भवा ऐर्यापथिका, अथवा पथि जाता पथिका. ईर्यायां ईरणे वा पथिका ईर्यापथिका, गच्छतः पथि या काचिद्विराधना सा ऐर्यापथिका ईर्यापथिका वा, तस्याः प्रतिक्रमणत्वप्ररूपिका सूत्रपद्धतिरपि ईर्यापथिकेत्युपचर्यते, तस्याः यो विचारश्चर्चा, सामायिकव्रते सामायिकदण्डकोच्चारात्पूर्वं वा पश्चाद्वा श्रमणोपासकानामीर्यापथिकाप्रतिक्रमणमिति विप्रतिपत्तिविषयतयोपलब्धस्तमिति कर्मनिर्देशः, केन करणभूतेन ? 'सुगुरूपदेशेन' सुगुरूणां—श्रीमद्युगप्रवरखरतरगणनायकानां श्रीजिनचन्द्रसूरिराजानां उपदेश—आज्ञा तेन. अथवा सुगुरूणां—पूर्वाचार्याणामुपदेशो—विधिनिषेधात्मको वाक्प्रसरस्तेनेत्यनेन परमोपकारिश्रीमद्गुरुपरम्परायाः समनुगतत्वेन समस्तसुविहितयतिजनादेयत्वमेतस्य ध्वनितं, एतावताऽभिधेयमुक्तं, 'वक्ष्य' इत्यात्मनेपदिकरूपोपादानेनात्मन एवार्थः—प्रयोजनमाविष्कृतं परार्थस्यापि वा वस्तुवृत्त्याऽऽत्मार्थत्वमेवावसेयं, सम्बन्धादिकं स्वयमभ्यूह्यं, न च 'जयति रागद्वेषाविति जिन' इत्येतद्व्युत्पत्त्या तस्मिञ्जनितानन्दत्वमसिद्धमिति वाच्यं, तस्याचिन्त्यमहात्म्योपेतत्वेन चिन्तामण्यादेरिव मनश्शुद्ध्याऽऽराधयन्तोऽभीष्टफलमाप्नुवन्ति प्रणताः इति चालना प्रत्यवस्थाने, इति गाथार्थः ।१। अथाधिकृतग्रन्थे सामायिकरूपनवमव्रताधिकारे एवेर्याप्रतिक्रान्तेः पौर्वापर्यरूपविचारो विचारयितुमुपक्रान्तोऽतः प्राक् सामायिकस्वरूपमेव निरूपयन् गाथामाह—

**सावज्जजोगपरिव—ज्जणाउ अणवज्जजोगसेवणओ । देसेण य सामाइयं, इत्तरियं देसविरयाणं ।२।**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–'देशविरतानां' देशेनैकदेशेन यथागृहीतभङ्गकपालनपरतया विरताः देशे वा विरताः देशविरतास्तेषां सामायिकं–सामायिकव्रतं, देशेनानुमोदनायाः प्रत्याख्येयेऽपि करणत्रयेणाप्यप्रत्याख्यातत्वात्करणकारणरूपाभ्यामेव करणद्वयेन प्रत्याख्येयस्य प्रत्याख्यातत्वाद्देशेनेति निर्देशः, 'इत्वरिकं' स्वल्पकालीनं, भवतीत्यध्याहार्यं, वीरतीर्थस्थस्य नव्यसाधोर्वस्तुवृत्त्या इत्वरसामायिकत्वेऽपि करणकारणानुमतिभिरिति करणत्रयेणापि सावद्ययोगानां प्रत्याख्यातत्वाद्देशेनेति विशेषणं व्यावर्त्तकमेव, नापार्थं, कस्मात् ? 'सावद्ययोगपरिवर्जनादनवद्ययोगसेवनात्'[1] 'कोलिकनलिका'न्यायेन देशेनेति पदं पश्चादपि योज्यं, सहावद्येन-दोषेण वर्त्तन्ते ये ते सावद्यास्ते च ते योगाश्च मनोवाक्कायरूपास्तेषां परि-सामस्त्येन वर्जनं-निषेधस्तस्मादनवद्यानां-निर्दोषाणां योगानां-ध्यानमौनक्रियादिनिबद्धानां सेवनात्-समाचरणाद्देशेनैवोपासकानां सामायिके–सावद्ययोगपरिवर्जनमनवद्ययोगासेवनं चेति भावः, सर्वविरतिसामायिके तु भूयसां नयानां समवतारस्तथाचाहावश्यकचूर्णिकृत् "सावज्जजोगविरतो तिगुत्तो छसु संजतो उवउत्तो जतमाणो अत्ता सामाइयं भवति त्ति" इत्यादि बहुज्ञेयं इति गाथार्थः ।२। तदेवं सामायिकस्वरूपं निरूप्य सामायिकस्य फलमाह–

**विहिपुव्वं गहणेणं, विहिपुव्वं पालणेण य पसत्थं । सामाइयवयमेयं, वंछियफलदायगं होइ ।३।**

---

१ न चेदमनागमिकं, आवश्यकसूत्रे बृहद्वृत्तौ च तथैवोक्तत्वात्, तथाहि–"सामाइयं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च" इत्येतत्सूत्रव्याख्याने श्रीमद्धरिभद्रसूरिभिः "अवद्यं–गर्हितं पापं, सहावद्येन सावद्यः, योगो–व्यापारः कायिकादिस्तस्य परिवर्जनं–परित्यागः कालावधिनेति गम्यते, तत्र मा भूत्सावद्ययोगपरिवर्ज्जनमात्रमपापव्यापारासेवनशून्यमित्यत आह–निरवद्ययोगप्रतिसेवनं चेति" इत्यनेन सावद्ययोगपरिवर्जनपुरस्सरमेव निरवद्ययोगप्रतिसेवनं कर्त्तव्यतया स्पष्टं प्रतिपादितं, ततश्च युक्तमेव पूर्वं सावद्ययोगपरिवर्जनरूपसामायिकदण्डकोच्चारणं पश्चादेव निरवद्ययोगप्रतिसेवनरूपमीर्यापथिकीप्रतिक्रमणमिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–'एय'मित्येतत्पूर्ववर्णितस्वरूपं सामायिकव्रतं वाञ्छितफलदायकं भवति, वाञ्छितं–सद्दृष्टिभिस्समीहितं यत्फलं कर्मनिर्जरारूपं तद्ददातीति वाञ्छितफलदायकं, केन ? 'विधिपूर्वं ग्रहणेन' विधिवत्तयाऽङ्गीकारेण तथा 'विधिपूर्वं पालनेन च' कायिकवाचिकमानसदोषाणामसाङ्कर्त्येन यथागृहीतव्रतपारप्रापणेन च, किम्भूतं तत् ? 'प्रशस्तं'प्रधानं, अविधिना ग्रहणे पालने चाभीष्टफलानाप्त्या निष्फलतैव भवेदिति भावः ।३। अथ विधिगृहीतसामायिकस्य सफलत्वे सिद्धे येन विधिना विहितं तत्सफलं स्यात्तमेव विधिं ग्रन्थमूलं दर्शयन् ग्रन्थनामान्येवाह–

**तस्स विहि विन्नेया, आवस्सगवित्तिपमुहगंथाओ । सच्छंदकप्पिआ पुण, देइ फलं दुग्गइरूवं ।४।**

व्याख्या–'तस्य'सामायिकस्य'विधिः'करणपद्धतिः, श्रीमदावश्यकबृहद्वृत्तिप्रमुखग्रन्थाद्'विज्ञेयो'विशिष्टश्रुतपरिकर्मितमतितया विशेषेणाभ्युपगन्तव्यः, प्रमुखग्रहणादावश्यकचूर्णिपञ्चाशकविवरण(तच्चूर्णि)नवपदप्रकरणवृत्तिप्रमुखप्रसिद्धसकलशिष्टजनसम्मतग्रन्थग्रहणं ज्ञेयं, 'स्वच्छन्दकल्पित'स्तत्तच्छास्त्रनिरपेक्षतया स्वाकुशलप्रज्ञावलेपावलिप्तमतितया'स्वच्छन्देन'स्वाभिप्रायेण शास्त्रनिबद्धार्थानां विपरीतार्थप्ररूपणतया'कल्पितः' कल्पनाविषयी कृतो विधिः, पुनः शब्दः पूर्वप्रदर्शितफलापेक्षया फलान्तरद्योतको, 'दुर्गतिरूपं'नरकतिर्यक्कुदेवकुमानवरूपकुगतिस्वरूपं फलं ददाति, स्वमतिविहितक्रियाऽनुष्ठानानुगततया विपरीतागमार्थप्ररूपितत्वेन च दुर्लभबोधित्वं जनयतीति भावः, तत्प्ररूपणाकारकाणां त्ववश्यमनाराधकत्वमिति गाथार्थः ।४। अथ विप्रतिपत्तिपरिज्ञानपूर्वकत्वान्निर्णयस्येति विप्रतिपत्तिमेवाह–

**तत्थ य इरियावहिया, सामाइअदंडगस्स पाढाओ । पुव्विं वा पच्छा वा, विप्पडिवत्ती भवे एसा ।५।**

व्याख्या–'तत्थ'त्ति अधिकारवशात्'तत्र'ति सामायिककरणविधौ सामायिकस्य ''करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि''

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि "वोसिरामि" इत्यन्तपाठरूपस्य यो दण्डकोऽव्यवच्छिन्नोच्चारतया दण्डककल्पो यः पाठः स सामायिकदण्डकस्तस्य 'पाठात्' उच्चारात् 'ईर्यापथिका' समयप्रसिद्धक्रियाविशेषरूपा, पूर्वं वा पश्चाद्वा, प्रतिक्रमणीयेति योज्यं, एषा विप्रतिपत्तिर्भवतीत्यन्वयार्थः, तत्र पूर्वमिति पदात्पूर्वपक्षपरिग्रहः, पश्चाद्वेति पदात्सिद्धान्तः, पूर्वपक्षपूर्वकत्वात्सिद्धान्तस्येति पूर्वं वा पश्चाद्वेति क्रमनिर्देशः, इति गाथार्थः ।५। तदेवमन्योऽन्यमीर्यापथिकीप्रतिक्रमणे विप्रतिपत्तिमुपदर्श्य पूर्वपक्षप्रवृत्तिबीजभूतवस्तुस्वरूपमुपवर्णयितुं शास्त्राणां नामोच्चारपूर्वकमीर्यापथिकी-प्रतिक्रमणव्यवस्थां गाथाद्वयेनाह—

आवस्सगपंचासग-वरनवपयपयरणाण वित्तीओ । पडिक्कमणस्स य पंचा-सगस्स चुण्णिओ तह पच्छा ।६।
पणिवायाणंतरिआ, सामाइअदंडगाउ इह इरिया । उवलद्धा वरगीयत्थ-सम्मया सुत्तपडिबद्धा ।७।

व्याख्या—'इहे'ति सामायिककरणव्यतिकरे आवश्यकपश्चाशकवरनवपदप्रकरणानां वृत्तितः, प्रतिक्रमणस्य च पुनः पश्चाशकस्य चूर्णितः सामायिकदण्डकात्पश्चात् 'इर्या'पदैकदेशे पदसमुदायोपचारादीर्यापथिका उपलब्धेति सम्बन्धः, किम्भूतेर्या ?, प्रणिपातानन्तरिता, 'प्रणिपातेन' प्रणिपातदण्डकेन "नमुत्थु ण"मित्यादिस्वरूपेण चैत्यवन्दनेना'ऽनन्तरिता'ऽव्यहिता, पुनः किम्भूता ? वरगीतार्थसम्मता, 'वराः' प्रधानास्ते च ते गीतार्थाश्च वरगीतार्थास्तेषां 'सम्मता'ऽभीष्टा वरगीतार्थसम्मता, 'गीतं' सूत्रं 'अर्थ'स्तु तद्व्याख्यानं निर्युक्त्यादि, तद्द्वयवन्तो गीतार्थास्तेष्वपि यद्वरत्वं तद्विशिष्टश्रुतधरत्वनिवेदनपरं, अल्पश्रुतैर्हि—विशिष्टज्ञानविकलैः पल्लवग्रहणमात्रनिर्युक्तमतिभिर्यथावत्तया वस्तुनविधार्येत इति भावः, पुनः किम्भूता ?, सूत्रप्रतिबद्धा, सूत्रत्वेन गणधरकृतत्वात् 'प्रतिबद्धा' रचिता सूत्रप्रतिबद्धा. आवश्यकसूत्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मध्यगतपाठेत्यर्थः, सूत्रप्रतिबद्धेति विशेषणेन पूर्वपक्षिणो गमनव्यावृत्तिरूपार्थान्तरघटितयेर्यापथिकयेष्टापत्तिरपास्ता द्रष्टव्या, अथ सूत्रे ये आवश्यकादयो ग्रन्थाः सङ्गृहीतास्तेऽव्यस्तपाठतया दर्श्यन्ते, तथा चावश्यकबृहद्वृत्ति (पत्र ८३२) "इह सावगो दुविधो–इड्ढिपत्तो अणिड्ढिपत्तो य, जो सो अणिड्ढिपत्तो सो चेइयघरे साहुसमीवे वा घरे वा पोसहसालाए जत्थ वा वीसमइ अच्छति वा निवावारो सवत्थ करेइ, तत्थ चउसु ठाणेसु णियमा कायवं–चेइयघरे साधुमूले पोसहसालाए घरे आवासगं करेंतो त्ति, तत्थ जइ साहुसगासे करेइ तत्थ का विही ?, जइ परंपरभयं णत्थि. जइ केणइ समं विवाओ णत्थि. जइ कस्सइ ण धरेइ मा तेण अंछवियंछियं कहिज्जइ. जइ य धारणगं दट्ठूणं ण गिण्हइ मा भंडिहि त्ति. जइ वावारं ण वावारेइ. ताहे घरे चेव सामाइयं काऊण वच्चइ एवं–पंच समिओ तिगुत्तो इरियाए उवउत्तो जहा साहू भासाए सावज्जं परिहरेंतो एसणाए कट्ठं वा लेट्ठुं वा पडिलेहिउं पमज्जिउं, एवं आयाणे णिक्खेवणे, खेलसिंघाणए ण विगिंचइ, विगिंचंतो वा पडिलेहेइ य पमज्जइ य, जत्थ चिट्ठइ तत्थ वि गुत्ति णिरोहं करेइ, एताए विहीए गंता तिविहेण णमिऊण साहुणो पच्छा सामाइयं करेइ 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव साहुं पज्जुवासामि'त्ति काऊण पच्छा इरियावहियाए पडिक्कमइ, पच्छा आलोएत्ता वंदइ आयरियाई जहाराइणिया, पुणोवि गुरुं वंदित्ता पडिलेहित्ता णिविट्ठो पुच्छइ पढइ वा, एवं चेइयाइएसु वि, जया सगिहे पोसहसालाए वा आवासए वा तत्थ णवरि गमणं णत्थि, जो इड्ढिपत्तो सो सव्विड्ढिए एइ, तेण जणस्स अत्था होइ, आढिया य साहुणो सुपुरिसपरिग्गहेणं, जइ सो कयसामाइओ एइ ताहे आसहत्थिमाइणा जणेण य अहिगरणे वट्टइ ताहे ण करेइ, कयसामाइएण य पाएहिं आगंतव्वं तेण ण करेइ, आगओ साहुसमीवे करेइ, जइ सो सावओ ण कोइ उट्ठेइ, अह अहाभद्दओ एति ता पूया कया होउ त्ति भण्णति, ताहे पुव्वरइयं आसणं कीरइ, आयरियाणं उट्ठिया य अच्छंति, तत्थ उट्ठेंतमणुट्ठेंते दोसा विभासियव्वा,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पच्छा सो इड्ढिपत्तो सामाइयं करेइ अणेण विहिणा–'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामि'त्ति, एवं सामाइयं काऊण पडिक्कंतो वंदित्ता पुच्छति, सो य किर सामाइयं कुणंतो मउडं अवणेति, कुंडलाणि णाममुद्दं पुप्फतंबोलपावारगमादि वोसिरइ" इत्येवं श्रीहरिभद्रसूरिभिश्चतुर्ष्वपि स्थानेषु सामायिकाधिकारे ऋद्धिप्राप्तानृद्धिप्राप्तयोः श्राद्धयोः सामायिकदण्डकपाठादव्यवहित एवेर्यापथिकीपाठः स्पष्टीकृतः, तथा (पत्र २३) पञ्चाशकवृत्तिर्यथा "अनेन विधिना गत्वा त्रिविधेन साधून्नत्वा सामायिकं करोति 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि जाव साहू पज्जुवासामि दुविहं तिविहेणं' इत्याद्युच्चारणतः, तत ईर्यापथिकायाः प्रतिक्रामति, पश्चादालोच्य वन्दते आचार्यादीन् यथारात्निकतया, पुनरपि गुरुं वन्दित्वा प्रत्युपेक्ष्य निविष्टः पृच्छति वा पठति वा, एवं चैत्येष्वपि, यदा तु स्वगृहे पौषधशालायां वा तदा गमनं नास्ति, यः पुनर्ऋद्धिप्राप्तः स सर्वर्द्ध्या याति, तेन जनस्यास्था भवति, आदृताश्च साधवः सुपुरुषपरिग्रहेण भवन्ति, यदि त्वसौ कृतसामायिक एति तदाऽश्वहस्त्यादिभिरधिकरणं स्यात्तच्च न वर्त्तते कर्त्तुमित्यसौ तन्न करोति, तथा कृतसामायिकेन पादाभ्यामेवागन्तव्यमिति च तन्न करोतीति, तथा यद्यसौ श्रावकस्तदा तं न कोऽप्यभ्युत्तिष्ठति, अथ यथाभद्रकस्तदा पूजा कृता भवत्विति पूर्वरचितमासनं क्रियते, आचार्याश्चोत्थिता एवासते, मोत्थानानुत्थानकृता दोषा अभूवन्, पश्चादसावृद्धिप्राप्तश्रावकः सामायिकं करोति, कथं ? 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामि' इत्यादि, एवं सामायिकं कृत्वेर्यां प्रतिक्रान्तो वन्दित्वा पृच्छति वा पठति वा, स च किल सामायिकं कुर्वन् कुण्डले नाममुद्राश्चापनयति, पुष्पताम्बूलप्रावारादिकं च व्युत्सृजतीत्येष विधिः सामायिकस्येति गाथार्थः" इति श्रीपञ्चाशकवृत्तावप्यस्मत्परमगुरवः श्रीमदभयदेवाचार्याः सर्वत्र सामायिकाधिकारे सामायिकदण्डकपाठानन्तरमेवेर्यां निजगदुः, अथ नवपदप्रकरणविवरणे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





(२४३ पत्रे) उकेश(कमला)गच्छीयाः श्रीयशोदेवोपाध्यायाः ''आगतश्च त्रिविधेन साधून्नमस्कृत्य तत्साक्षिकं सामायिकं पुनः करोति 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव साहुं पज्जुवासामि' इत्यादिसूत्रमुच्चार्य तत ईर्यापथिकीं प्रतिक्रामत्यागमनं चालोचयति, तत आचार्यादीन् यथारत्नाधिकतयाऽभिवन्द्य सर्वसाधून् उपयुक्तोपविष्टः पठति पुस्तकवाचनादि वा करोति, चैत्यगृहे तु यदि साधवो न सन्ति तदेर्यापथिकाप्रतिक्रमणपूर्वकमागमनालोचनां विधाय चैत्यवन्दनां करोति, ततः पठनादि विधत्ते, साधुसद्भावे तु पूर्व एव विधिः, एवं पौषधशालायामपि, केवलं यथा गृहे आवश्यकं कुर्वाणो गृण्हाति तथैव च गमनविरहितं, न चावश्यकं श्रावकस्य न सम्भवतीति वाच्यं 'समणेण सावएण य, अवस्सकायव्वं हवइ जम्हा' इत्यादिवचनप्रतिष्ठितत्वादस्य, मुखवस्त्रिकाप्रत्युपेक्षणपूर्वं च सर्वत्र सामायिकं साध्वादिसमीपे विधिना ग्राह्यमिति, ऋद्धिप्राप्तस्तु चैत्यगृहं साधुमूलं वा महद्धर्चैवैति. येन लोकस्यास्था जायते, चैत्यानि साधवश्च सत्पुरुषपरिग्रहेण विशेषपूज्यानि भवन्ति, पूजितपूजकत्वाल्लोकस्य, अतस्तेन गृह एव सामायिकमादाय नागन्तव्यं, अधिकरणभयेन हस्त्यश्वाद्यनानयनप्रसङ्गात्, आयातश्च चैत्यालये विधिना प्रविश्य चैत्यानि च द्रव्यभावस्तवेनाभिष्टूय यथासम्भवं साधुसमीपे मुखपोतिकाप्रत्युपेक्षणपूर्वं 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामि' इत्याद्युच्चार्येर्यापथिकीं प्रतिक्रमस्य यथारात्निकतया सर्वसाधूंश्चाभिवन्द्य प्रच्छनादि करोति'' इति वाक्यैरनृद्धिप्राप्तर्द्धिप्राप्तयोरुभयोरपि श्राद्धयोश्चतुर्षु स्थानेषु सामायिकदण्डकपाठादन्वेवेर्यापथिकीप्रतिक्रमणं सश्रवणानां श्रवणगोचरी चक्रुः, तथा नवपदप्रकरणस्यैव ततोऽपि चिरन्तनस्वोपज्ञवृत्तौ (४२ पत्रे) त्रिसप्तत्यधिकसहस्रमितवर्षकृतायां ओकेशगच्छीयाः श्रीदेवगुप्तसूरयोऽपि ''तथा चागमः– 'सोय सावओ (उवासओ)दुविहो–इड्ढिपत्तो अणिड्ढिपत्तो य, जो सो इड्ढिपत्तो सो गओ साहुसमीवे करेइ सामाइयं, जो पुण अणिड्ढिपत्तो सो घराओ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चेव सामाइयं काऊण पंचसमिओ तिगुत्तो जहा साहू तहा आगच्छइ, साहुसमीवे पत्तो पुणा वि सामाइयं करेइ, इरियावहियाए पडिक्कमइ, तो जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ पच्छा पढइ सुणइ वा' तथा [1]तत्रैव पुनः स्थानान्तरेऽप्युक्तं–'इह पञ्चविधाचारातिचार-विशुद्ध्यर्थं श्रावकः प्रतिक्रमणं करो ति. तत्र चायं विधिः–प्रथमं साध्वादिसमीपे मुखवस्त्रिकां प्रत्युपेक्ष्य विधिना सामायिकं करोतीत्यादि" इत्येवम्भूतप्रभूतसद्भूतपाठपठनेनाऽऽदृतां सामायिकपाठानुगतामेवेर्यापथिकीं व्यक्तिचक्रिरे, तथा श्रावकप्रतिक्रमणचूर्णावपि चन्द्रगच्छीय-श्रीविजयसिंहाचार्याः "वंदिऊण य गुरुणो छोभावंदणएण संदिसाविय सामाइयदंडगमणुकड्ढइ, जहा–'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि जाव नियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते ! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि'तओ इरियावहियाए पडिक्कमिय आगमणं आलोएइ, पच्छा जहाजेट्ठं साहुणो वंदिऊण पढइ सुणइ व त्ति" एवं अनेनापि पाठेन सामायिकपाठादव्यवहितामेवेर्यापथिकीं प्रादुरकार्षुः, तथा पञ्चाशकचूर्णावपि श्रीयशोदेवसूरिभिः "एएण विहिणा गंतूण तिविहेण साहुणो नमिऊण सामाइयं करेइ 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि जाव साहुणो पज्जुवासामि दुविहं तिविहेणं' एवमाइ उच्चरिऊण ततो इरियावहियाए पडिक्कमइ, पच्छा आलोइत्ता वंदइ आयरियाइ जहारायणियाए, पुणरवि गुरुं वंदित्ता पडिलेहित्ता भूमिं णिविट्ठो पुच्छइ पढइ वा, एवं चेइएसु वि, असइ साहुचेइयाणं पोसहसालाए सगिहे वा सामाइयं आवस्सयं वा करेइ, तत्थ नवरि गमणं नत्थि, भणइ–जाव नियमं समाणेमि त्ति, जो पुण इड्ढिपत्तो सो सव्वरिद्धिए जाइ, तेण जणस्स अत्था होइ–आदर इत्यर्थः, आढिया य साहुणो सुपुरिसपरिग्गहेणं भवंति, जइ पुण सो कयसामाइओ एइ तया आसहत्थिमाईहिं अहिगरणं होज्जा, तं

[1] "अन्यत्राप्युक्त"मिति मुद्रितायां ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुण न वट्टइ काउं ति, अओ ण करेइ, तहा कयसामाइएण य पाएहिं आगंतव्वं, तेण न करेइ, आगओ चेव साहुसमीवे करेइ, जइ सो सावओ तया तस्स न कोइ अब्भुट्ठेइ, अह अहाभद्दओ तया पूया कया होउ त्ति पुव्वरइयं आसणं कीरइ, आयरिया य उट्ठिया चेव अच्छंति, मा उट्ठाणाणुट्ठाणकया दोसा भवेज्जा, पच्छा सो इड्ढिपत्तो सावगो सामाइयं करेइ, कहं ?, 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामि' एवमाइ, एवं सामाइयं काऊण इरियावहियं पडिक्कंतो वंदित्ता पुच्छइ वा पढइ वा" इति (प्रथम पञ्चाशकस्य पञ्चविंशतितमाया गाथायाश्चूर्णि) पाठादृद्धिप्राप्तानृद्धिप्राप्तयोरुभयोरपि सामायिककर्त्रोः सर्वत्र सामायिकं कुर्वतः सामायिकपाठादव्यवहित एवेर्यापाठः प्रगुणीकृतः, उपलक्षणाद्योगशास्त्रवृत्तावपि (पत्राकारमुद्रिते १७६ पत्रे) श्रीहेमाचार्याः "एवं कृत-सामायिक ईर्यापथिकायाः प्रतिक्रामति, पश्चादागमनमालोच्य यथाज्येष्ठमाचार्यादीन्वन्दते" इत्यादिपाठेन सामायिकपाठानन्तरमेवेर्यापथिकां निरूपितवन्तः, (तथा हारिभद्रीयश्रावकधर्मविधिप्रकरणवृत्तौ ८७ पत्रे श्रीमन्मानदेवसूरयोऽप्येनमेव विधिं प्रतिपादयाञ्चक्रुः) इत्येवं सर्वत्र विधिवादेन सामायिकदण्डकपाठानन्तरमेवेर्या समवसेया, चरितानुवादेन तु विक्रमाच्चत्वारिंशदधिकैकादशशतवत्सरे वर्त्तिष्णु नवाङ्गवृत्तिकारक-श्रीमदभयदेवसूरिचरणेन्दीवरचञ्चरीकश्रीमद्वर्द्धमानसूरिविरचिते कथाकोशग्रन्थे पञ्चमाणुव्रतफलवर्णनाधिकारे श्रीवर्द्धमानसूरयः "जिणगुत्तो नवकारपुरस्सरं काऊण निसीहियं पविट्ठो पासाए, कयसामाइओ इरियावहियं पडिक्कमिऊण जो कोइ एत्थ अच्छइ देवो वा दाणवो वा भूओ वा सो मज्झ अणुजाणेउ भवणमिणं ति भणिऊण सज्झायं काउमाढत्तो" इति वाक्येन पश्चादेव सामायिकपाठादीर्यां प्रचकटुः, एवं ज्ञेयं, इति गाथार्थः ।६-७। ननु श्रीमदावश्यकचूर्णौ सामायिकदण्डकपाठात्पश्चाच्चैत्यवन्दनकेन या व्यवहितेर्या उपलब्धा तत्र का गतिरित्याह—

**आवस्सगचुण्णीए, जं पणिवाएण संतरा इरिया । [1]पणिवाए णाणत्तं, तत्थ य केणवि विसेसेणं ।८।**

---

१ "तत्थ गइपणिवाए, णाणत्तं कहमवि सत्थेसु ।८।" इति प्रत्यन्तरे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—आवश्यकचूर्णौ पूर्वाचार्यकृतायां यत् 'प्रणिपातेन' प्रणिपात—नमुत्थु णं दण्डकेन चैत्यवन्दनारूपेण 'सान्तरा' सव्यवधाना 'ईर्या'पदैकदेशे पदसमुदायोपचारादीर्यापथिका, सामायिकदण्डकपाठादिति प्रस्तावाद्योऽयं. [1]तत्र च प्रतिविधीयते इत्यावेद्यं, प्रणिपाते 'केनचिद्विशेषेण'सामाचारीविशेषादिना 'नानात्वं' भिन्नवाक्यतेत्यर्थः, इति गाथासमुदायार्थः. अथ प्रतिपदं व्याख्यायते, तत्रावश्यकचूर्णिः (मुद्रितोत्तरार्द्धपृष्ठ २९९) "तत्थ सामाइयं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च, तं च सावगेण कहं कायव्वं ?, सो सावगो दुविहो—इड्ढिपत्तो अणिड्ढिपत्तो य, जो सो अणिड्ढिपत्तो सो चेइयघरे वा साहुसमीवे वा घरे वा पोसहसालाए वा जत्थ वा वीसमति अच्छति वा णिव्वावारो सव्वत्थ करेइ सव्वं, चउसु ठाणेसु णियमा कायव्वं, तंजहा—चेइयघरे साधुमूले पोसहसालाए वा घरे वा आवासगं करेंतो त्ति, तत्थ जइ साहुसगासे करेति तत्थ का विही ?, जइ पारंपरभयं णत्थि. जइवि अ केणइ समं विवाओ णत्थि. जइ कस्सइ दव्वं ण धरेइ मा तेण अंछविअंछियं कड्ढिज्जइ. जइ धारणगं दट्ठूण ण गिण्हइ मा भंडिज्जिहि त्ति, पढमं जइ अ वावारं ण वावारेइ. ताहे घरे चेव सामाइयं काऊण उवाणहाओ मोत्तूण सचित्तदव्वविरहितो वच्चति, पंचसमिओ तिगुत्तो इरियाए उवउत्ते जहा साहू भासाए सावज्जं परिहरंतो, एसणाए कट्ठं वा लेट्ठुं वा पडिलेहिउं पमज्जिउं, एवं आदाणे णिक्खेवणे, खेलसिंघाणे ण विगिंचति, विगिंचंतो वा पडिलेहिय पमज्जिय थंडिले, जत्थ चिट्ठइ तत्थ गुत्तिनिरोहं करेइ, एताए विहीए गंता तिविहेण साहुणो णमिऊण पच्छा साहुसक्खियं सामाइयं करेइ 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव साहू पज्जुवासामि'त्ति काऊणं, जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ, साहूणं सगासाओ रयहरणं णिसेज्जं वा मग्गति, अह घरे तो से उवग्गहियं रयहरणं अत्थि, तस्स असति

[1] "तत्र गति विधीयते इत्यावेद्यं, प्रणिपाते 'कथमपि' केनचित्सामाचारीविशेषादिना शास्त्रेषु 'नानात्वं' भिन्नवाक्यतेत्यर्थः" इति प्रत्यन्तरे ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पोसहस्स अंतेणं, पच्छा इरियावहियाए पडिकमइ, पच्छा आलोइत्ता वंदइ आयरियादी जहारायणियाए त्ति, पुणोवि गुरुं वंदित्ता पडिलेहित्ता णिविट्ठो पुच्छइ पढइ वा, एवं चेइएसु वि, असति साहूचेइयाणं पोसहसालाए वा सगिहे वा एवं सामाइयं वा आवासयं (आवस्सयं) वा करेइ, तत्थ नवरि गमणं णत्थि, भणइ–जाव नियमं समाणेमि । जो इड्ढिपत्तो सो किर एंतो सव्विड्ढिए एइ तो जणस्स अत्था होइ, आढिता य साहुणो सप्पुरिसपरिग्गहेणं, जइ सो कयसामाइओ एइ ताहे आसहत्थिमाइजणेण य अहिगरणं पवट्टइ ताहे ण करेइ, कयसामाइएण य पाएहिं आगंतव्वं तेण न करेइ, आगओ साहुसगासे करेइ, जइ सो सावओ ण कोइ उट्ठेइ, अह अहाभद्दओ त्ति पूया कया होउ त्ति भण्णइ, ताहे पुव्वरइयं आसणं कीरइ, आयरियाणं उट्ठिया अच्छंति, तत्थ उट्ठेंतमणुट्ठेंते दोसा भाणियव्वा, पच्छा सो इड्ढिपत्तो सामाइयं काऊण पडिक्कंतो वंदित्ता पुच्छइ, सो य किर सामाइयं करेंतो मउडं ण अवणेति, कुंडलाणि णाममुद्दं पुप्फतंबोलपावारगमादि वोसिरइ, अन्ने भणंति–मउडंपि अवणेति, एसा विही सामाइयस्स'' इत्यत्र ''जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ'' इति वाक्येन सामायिकदण्डकाच्चैत्यवन्दनान्तरिता ईर्यापथिकाप्रोक्ता, तत्र सामायिककरणे चैत्यवन्दनायां सामाचारीविशेषा'न्नानात्वं' विसदृशत्वमभ्यूह्यं, तद्यथा ''चेइहरसाहुगिहमा–इएसु सामाइयं समो कुज्जा । पणिवायाणंतर साहु–वंदिउं कुणइ सामाइयं ।१।'' इति गाथाव्याख्यायामाह श्रीनवपदप्रकरणविवरणकृत् श्रीमद्यशोदेवोपाध्यायाः ''प्रणिपातः–प्रणिपातदण्डको 'नमुत्थु ण'मित्यादिस्तस्मादनन्तरं साधून् वन्दित्वा–यतीनभिवाद्य करोति सामायिकं, क्वचिच्च 'पणिवायाणंतरसाहुवंदणं'ति पाठः, तत्र प्रणिपातानन्तरं साधुवन्दनं यत्र सामायिककरणे तत्तथेति क्रियाविशेषणं दृश्यं । अयं च विधिः श्रीवसुदेवसूरिभिर्व्याख्यातः, परं न प्रायः सामाचार्येवं दृश्यत इति, तदनुसारेणैवं व्याख्या–प्रणिपतनं–प्रणिपातः सामान्येन प्रणाममात्रं, स च साध्ववग्रहसूचनादत्र साधूनामेव द्रष्टव्यः, तस्मादनन्तरं साधुवन्दनं कृत्वा सामा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यिकं करोति, यद्वा प्रणिपातानन्तरमित्यनेनार्हच्चैत्यासन्नविधिरभिहितः, साधून्वन्दित्वेत्यनेन तु साध्वासन्नविधिः, यतो यत्रार्हच्चैत्यानि तत्र तद्वन्दनापूर्वं सामायिकं ग्राह्यं, चैत्यवन्दना तु प्रणिपातदण्डकपूर्विकैवेति" (२४२ पत्रे), एतत्पाठानुसारेणोभयार्थप्ररूपणायां चैत्यवन्दना सामायिककरणात्प्रागेव प्ररूपिता, अपरं च श्रीनवपदप्रकरणस्य श्रीदेवगुप्तसूरिकृतस्वोपज्ञविवरणे (४२ पत्रे) यथा "साहु समीवे पत्तो पुणो वि सामइयं करेइ, इरियावहियाए पडिक्कमइ, तो जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ" एवंविधवाक्येन सामायिकदण्डकोच्चारादव्यवहितैर्यापथिकीप्रतिक्रमणात्पश्चात्त्वं चैत्यवन्दनस्य न्यसनमव्यस्त(मविपरीत)मेव, आवश्यकचूर्णौ तु साक्षादेव सामायिकदण्डकात्पश्चादीर्यापथिकायाश्च पूर्वं चैत्यवन्दनापाठाच्चैत्यवन्दनस्य सामायिकेर्ययोरभ्यन्तर्गतत्वं बोधितं, तथा "चेइहरसाहुगिहमाइएसु" इति पूर्वोक्तगाथाव्याख्याने श्रीयशोदेवोपाध्यायैः सामायिकात्प्रागेव चैत्यवन्दना प्रत्यपादी, तदेवं चैत्यवन्दने सामाचारीविशेषाद्विसदृशत्वं ज्ञेयं, साम्प्रतञ्च न कस्मिन्नपि गच्छे इयं सामाचारी—यत्सामायिकेर्यापथिकयोर्मध्ये चैत्यवन्दना क्रियते, यदि च कस्मिंश्चिद्गच्छे सा स्यात्तदा स्यात्, तथात्वेऽपि सामायिकदण्डकात्पश्चात्त्वमेवायातमीर्यापथिकायाः, का नो हानिः?, सिद्धं नः समीहितं, यद्वा आवश्यकचूर्णौ "जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ" इति वाक्ये 'प्रथम'मिति सामायिकात्प्राग् इत्यर्थोऽवसेयः, "पणिवायाणंतरसाहुवंदण"मिति पाठे नवपदप्रकरणवृत्तिकृता "यत्रार्हच्चैत्यानि तत्र तद्वन्दनापूर्वं सामायिकं ग्राह्य"मित्यर्थकरणेनैतदर्थस्यैव समर्थनात्, तथा च नाशङ्कालेशोऽपि भाव्यः इति गाथार्थः ।८। ननु पूर्वसमाधाने सामायिकेर्यापथिकयोः सम्बन्धः साक्षाद्रूपो गतः, गते एव कथमिष्टसिद्धिरित्यत आह—

**सामाइयइरियाणं, न य कारणकज्जभावसंबंधो । पुव्वावरभावाओ, सज्झायाईण सा हेऊ ।९।**

व्याख्या—सामायिकं चेर्या च सामायिकेर्ये, तयोः सामायिकेर्ययोः कारणकार्यभावसम्बन्धः, चस्यैवार्थत्वा'न्न च'नैव, अयंभावः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न चेर्यायाः कारणत्वं सामायिकस्य च कार्यत्वं, तत्तच्छास्त्रेषु तस्याः(ईर्यायाः) सामायिकात्पूर्ववर्त्तित्वस्यानवबोधनात्, महानिशीथवाक्यस्य तु सामायिकविशेषविषयत्वेन जघन्यचैत्यवन्दनायामिवात्राप्यनवकाश इत्यर्थस्य समर्थ्यमानत्वात्, पूर्ववर्त्तित्वाभावे च कारणत्वमपि[1] ईर्यायाः न सम्प्रतीतस्याऽविरुद्धं भाति, न च सामायिकस्य कारणत्वमीर्यायाः कार्यत्वं, ईर्यार्थं मया सामायिकमङ्गीक्रियत इति प्रतीतेरभावात्, रात्रिपौषधिकश्राद्धकृतसामायिके तस्याः पश्चाद्वृत्तित्वाभावाच्च, तथा च सामायिकव्रते कथं सा सार्थका भवेत्?, तत्राह–'स्वाध्यायादीनां' स्वाध्यायवन्दनकोपविशनादीनां'सा'ईर्यापथिका'हेतुः'कारणं, तत्र हेतुमाह-पूर्वापरभावात्, तथा चेर्यायाः कारणत्वं स्वाध्यायादीनां कार्यत्वं, सर्वशास्त्रेषु तस्याः स्वाध्यायादीन्प्रति नियतपूर्ववर्त्तित्वस्य पूर्वाचार्यैरुद्बोधनान्महानिशीथवाक्येन तान्प्रति तस्या अनन्यथासिद्धत्वस्यापि प्ररूपणात्, तथा चेर्यापथिकी स्वाध्यायादिकृत्येभ्योऽव्यवहिता कृत्यान्तरेण व्यवहिता वा पूर्वं वर्त्तमाना स्वाध्यायादिकृत्यकारिणी भवतीति भावः, तत्रावश्यकवृत्त्याद्यभिप्रायेणाव्यवहिता सा स्वाध्यायादिकृत्यसाधिका नवपदविवरणाभिप्रायेण तु चैत्यवन्दनेनान्तराऽपि सा तत्कार्य-कारिणी भवतीति भावः, तथा च पौषधोच्चारनिमित्तं उपकरणप्रतिलेखनानिमित्तं वा प्रतिक्रान्ताऽपि ईर्या स्वाध्यायादिकृत्यकारिणी भवति क्रियान्तरव्यवहिताऽपि, एतावता च विपक्ष[2]विवक्षितार्द्धजरतीयदोषोऽपि दूरापास्त एव। ननु तर्हि पौषध इव सामायिकेऽपि पूर्वप्रतिक्रान्तैव सामायिकपोतिकाप्रतिलेखनसामायिकदण्डकपाठमात्रेण सान्तराऽपीर्या कथं न स्वाध्यायादिकार्यसाधिका भवेत्?, तत्र तेषु तेषु स्थानेषु सामायिकविधेः पौषधविधेश्च पार्थक्यदर्शनात्तथा च नास्माकमत्र कदाग्रहोऽस्ति, यदुत सर्वत्र सामायिकोच्चारादन्वेवेर्या,

१ "सामायिकं प्रति तस्याः विरुद्धं, नापि सामायिकस्य कारणत्व०" इति प्रत्यन्तरे। २ कदाग्रहेण स्वमतस्थापनैकबद्धकक्षत्वादावश्यकचूर्णिवृत्तिकारादिबहुश्रुताभिप्रायेणापि विरुद्धः पक्षो–विचारो यस्य स विपक्षः–धर्मसागरस्तेन स्वकृतेर्यापथिकीषट्त्रिंशिकाया एकोनविंशतितमगाथाया अवतरणिकायां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चाशकचूर्ण्युक्त्या कृतरात्रिपौषधस्य प्रातः पुनः सामायिकग्रहणे पूर्वमपि तस्या अङ्गीकारात्, तथा च तत्पाठः ''तओ राइए चरमजामे उट्ठिऊण इरियावहियं पडिक्कमिय पुव्विं व पोत्तिं पेहिय नमुक्कारपुव्वं सामाइयसुत्तं कड्ढिय संदिसाविय सज्झायं कुणइ'' इति, तथा च यत्र यो विधिर्गीतार्थैर्निबद्धः स तथैव विधेय इति वस्तुगतिरिति गाथार्थः ।९। एवं वस्तुव्यवस्थायां व्यवस्थापितायां यद्यप्यैदंयुगीनगच्छ-व्यवस्थयोपासकानां सामायिके पूर्वमीर्यां प्रतिक्रामयन्तोऽपि गाढाभिनिवेशाभावेनेर्यापथिकाया अर्थान्तरत्वं स्वमत्या सो(शो)धयन्तो (कुर्वन्तो) मध्यस्थाः गुरुपरम्परानुगताः सर्वेऽपि गच्छवासिनोऽस्माकं मान्या एव, परमीर्यापथिकेति पदस्य नव्यार्थकरणप्रवणा एव सर्वगच्छवासिनामिवास्माकमपि पूर्वपक्षितयाऽभिमता, अतस्तत्पूर्वपक्षिस्वरूपं सोपालम्भमाह—

**केवि य महानिसीहे, सामन्नपयं समेच्च अपईवा । न मुणंति इरियाए, नियसत्थविसेसपयपंतिं ।१०।**

व्याख्या—केऽपि च 'महानिशीथे'श्रीमहानिशीथसिद्धान्ते सामान्यं—सर्वकृत्यसाधारणं ''अपडिक्कंताए इरियावहियाए न कप्पइ चेव काउं किंचिवि, चियवंदणसज्झायझाणाइयं फलासायणमभिकंखुगाणं'' इत्यादिरूपं यत्पदं'सामान्यपदं' त'त्समेत्य' प्राप्य 'ईर्यायां' सामायिकव्रताधिकृतेर्यापथिकायां वाच्यायां, निजानि-आत्मीयानि, न तु नग्नाटानां, यानि शास्त्राणि—आवश्यकपञ्चाशकवृत्त्यादीनि, तेषु यानि विशेषपदानि सामायिकव्रतमात्रगोचरतया ''पच्छा इरियावहियाए पडिक्कमइ'' इत्येवंरूपाणि, तेषां या पंक्तिस्तां निजशास्त्रविशेषपदपंक्तिं 'न मुणंति'त्ति न जानन्ति विद्यमानामपि, किम्भूतास्ते ?, 'अप्रदीपाः' प्रकृष्टो दीप इव प्रदीपः—प्रवचनं, न विद्यते प्रदीपो येषु तेऽप्रदीपा अनागमा इत्यर्थः । अथवा 'महानिशीथे' महार्द्धरात्रसमये, च शब्दो अप्यर्थे, 'सामान्यं' समस्तसाधारणं यत् 'पदं'स्थानं सार्थन्यासरूपं सामान्यपदं, तत्'समेत्य'प्राप्यापि—सार्थेन सहैकस्थानावस्थिता अपि'ईर्यायां'समीप्सितपुरं प्रति प्रस्थितौ सत्यां'अप्रदीपाः'प्रदीपरहिता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





'निजसार्थविशेषपदपंक्ति'पुरः प्रस्थितात्मीयसार्थविशिष्टचरणपद्धतिं न जानन्ति, अप्रदीपाः इत्युपलक्षणं, तेन चन्द्रादिप्रकाशरहिता इति श्लेषार्थः, तथा च तेषामयमाशयः–'ईर्यापथिकायामप्रतिक्रान्तायां न कल्पत एव किञ्चिच्चैत्यवन्दना स्वाध्यायादि' इत्यागमवाक्येनास्माभिरेवमेव निरधारि यच्चैत्यवन्दकादिवत् किञ्चिच्छब्दसूचितानि सर्वाण्यपि धर्मकृत्यान्यऽविनेर्यापथिकादिकान्येव, तेन सामायिकमपि तदादिकमिति पूर्वपक्षबीजमिति भावः इति गाथार्थः ।१०। अथ सैद्धान्तिको महानिशीथवाक्यसमर्थनाय सामान्यविशेषव्यवस्थां दर्शयन्नाह–

**सामन्नं नूणमिणं, महानिसीहस्स छेयसुत्तस्स । वयणं बहुविसयाओ, णेयं सद्दाणुसासणओ ।११।**

व्याख्या–'नूनं'निश्चितं महानिशीथस्य छेदसूत्रस्य 'इणं' इत्येत'द्वचनं' वाक्यं सामान्यं, सामान्यमिति साध्यनिर्देशः तद्वचनमिति पक्षनिर्देशः, तत्र हेतुमाह–'बहुविषयत्वात्' बहवश्चैत्यवन्दनस्वाध्यायध्यानप्रतिक्रमणादिरूपाः क्रियाविषयीगोचराः विषयाः यस्य तद्बहुविषयं, तस्य भावस्तत्त्वं, तस्माद्बहुविषयत्वादिति हेतुः, यद्बहुविषयं तत्सामान्यं, सत्ता वत्, यत्सामान्यं न भवति तद्बहुविषयमपि न भवति, घटाद्येकव्यक्तिवदिति सव्याप्तिकमुदाहरणं'ज्ञेय'मवसेयमिति, कस्मात् ?, 'शब्दानुशासनतः' शब्दानुशासने–व्याकरणेऽपि सामान्यसूत्रविशेषसूत्रव्यवस्थायां सामान्यसूत्रव्यवस्था तदवस्थैव, एवञ्च तत्र महानिशीथसूत्रस्यापि सामान्यत्वमिति भावो गाथार्थः । ११ । एवं सामान्यसूत्रस्वरूपमुपवर्ण्य विशेषसूत्रव्यवस्थामाह–

**पत्तेयं विहिसुत्तं, जं तं तु विसेसमप्पविसयाओ । उस्सग्गाववायसुयं, एवं गीयाण सुपसिद्धं ।१२।**

व्याख्या–'तु'पुन'र्य'च्चैत्यवन्दनस्वाध्यायादिषु सर्वधर्मकृत्येषु'प्रत्येकं'चैत्यवन्दनाद्यन्यतमकृत्यं प्रति प्रति प्रत्येकं 'विधिसूत्रं'तत्कर्त्तव्यार्थोपदेशरूपसूत्रं आवश्यकवृत्त्यादि, 'तद्विशेषं' विशेषसूत्रं ज्ञेयमिति योज्यं, अल्पविषयत्वात्, तदालापकोक्तसर्वधर्मकृत्येष्वन्यतमव्यक्तिमात्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयत्वात्, तथा चावश्यकवृत्त्याद्युक्तसामायिकमात्रविधिसूत्रं विशेषसूत्रमित्यायातं, 'एवं' इत्यल्पविषयत्वबहुविषयत्वादिप्रकारेण'उत्सर्गापवादश्रुतं' उत्सर्गश्चापवादश्च (उत्सर्गापवादरूपं) यच्छ्रुतं तदुत्सर्गापवादश्रुतं, तत्'गीताना'मिति गीतार्थानां सुप्रसिद्धं, समयेऽपि तत्र तत्र स्थाने द्रव्यक्षेत्रादिनिमित्तनिरपेक्षत्वेन प्रवृत्तं सामान्यसूत्रतया प्रसिद्धमुत्सर्गसूत्रं, तथा द्रव्यक्षेत्रादिनिमित्तसापेक्षत्वेनाल्पविषयित्वाद्विशेषतया प्रसिद्धमपवादश्रुतं, उपलक्षणाच्च समस्तयतीनां साधारणतया सामान्यसूत्रं मासकल्पादिविहाररूपं, तथा पारिहारिकयथालन्दिकादिविशेषमुनिमुद्दिश्य "गामे इक्कराइयं णगरे पंचराइयं" इत्यादिरूपं विशिष्टसाधुविषयत्वाद्विशेषसूत्रं च समयविदां विदितमेवेति गाथार्थः ।१२।

तथा च सामान्यसूत्रविशेषसूत्रयोरेकत्र साङ्कर्ये किमङ्गीकार्यं ? तत्राह–

**सामन्ने य विसेसे, सुत्ते पत्ते विसेसविसयं जं । गीयाण लोइयाण य, तं सुत्तं बहुमयं तत्थ ।१३।**

व्याख्या–'सामान्ये'बहुविषये अनेकव्यक्तिसाधारण इति यावत्, च पुन'र्विशेषे च' अल्पविषये–एकव्यक्तिमात्रविषये इति यावत्, सूत्रे'प्राप्ते'युगपदेकत्र स्थाने विषयतयाऽऽगते सति यद्विशेषविषयं सूत्रं–व्यक्तिमात्रगोचरं तत्'तत्थ'त्ति तत्र स्थाने 'गीतानां' सूत्रार्थविदां गीतार्थानां 'बहुमतं' सकलशिष्टैकवाक्यतयाऽभिमतं, तथा'लौकिकानां' वैयाकरणानां च सम्मतमित्येतदत्रापि योज्यं, प्रसिद्धश्चैतत्तथाहि–गीतार्थैर्जिनकल्पिकस्थविरकल्पिकयथालन्दिकप्रतिमाप्रतिपन्नपारिहारिकप्रत्येकबुद्धादिसमस्तयतिगोचरे "तइयाए भिक्खायरिय"मित्येतस्मिन्सूत्रे प्रसिद्धेऽपि स्थविरकल्पिकानां "काले कालं समायरे" (दश० अ० ५ उ० २ गा० ४) इति विशेषसूत्रं सुप्रसिद्धमेव गच्छवासितयोररीकृतमिति, वैयाकरणैरपि "सामान्यशास्त्रतो नूनं, विशेषो बलवान् भवेत्" इति वाक्यप्रामाण्यात्, इवर्णोवर्णयोः समानजातीयसम्बन्धे सामान्यसूत्रेण यत्ववत्वप्राप्तौ सवर्णयोः स्वरयोः सम्बन्धे दीर्घत्वरूपविशेषसूत्रमङ्गीकृतमेव, इतरथा पदसिद्धिरूपप्रयोजना-

For Private And Personal Use Only

जनकत्वेन व्याकरणस्याप्यन्यथासिद्धत्वमेव, घटोत्पत्तौ रासभादेरिव, तथाऽत्रापि महानिशीथवाक्यस्य सर्वकृत्यविषयत्वेन सामान्यत्वं, आवश्यकवृत्त्यादिग्रन्थवाच्यसामायिकविधेः सर्वकृत्येषु केवलसामायिकमात्रकृत्यविषयत्वाद्विशेषत्वमित्यादि तथैव विवेचकैरङ्गीकारकैरङ्गीकार्य-मिति गाथार्थः ।१३। अथ पूर्वपक्षप्रतिपादनपुरस्सरं तदेव सामान्यविशेषरूपत्वं तयोः सोपनयं समर्थयन्नाह–

**आह परो कहमेयं, भण्णइ जइ सुत्तपयमसामन्नं । ता देवनरवराणं, चियवंदणयं कहं सुद्धं ? ।१४।**

व्याख्या–'परः'पूर्वपक्षी'आहे'ति वदति 'एतत्' सामान्यविशेषविषयव्यवस्थारूपं वाक्यं 'कथं' इति केन प्रकारेण भवेदिति योज्यं, तदेवं महानिशीथसूत्रं सर्वत्रापि चित्तशुद्ध्यादिफलजनकत्वेन चैत्यवन्दनादिधर्मकृत्येषु प्रतिव्यक्तिप्रमाणिकार्यं, ननु प्रतिव्यक्तिविशिष्टं [illegible], सूत्रान्तरे विशिष्टत्वसिद्धावस्य सूत्रस्य सामान्यत्वं भवेत्, साध्यमानविशिष्टत्वस्य निराकरिष्यमाणत्वादिति पूर्वपक्षोद्देश-[illegible] 'भण्णइ'त्ति भण्यते–व्यक्ततया प्रतिपाद्यते प्रतिवचनमित्युपस्कारः, यदि'सूत्रपदं' महानिशीथसूत्रवचनं'असामान्यं'सामान्यं न भवेत्, अथवा पर्युदासवृत्त्या व्याख्याने सामान्यसदृशमसामान्यं विशेषरूपं–चैत्यवन्दनादिविशेषविषयं भवेत्, 'ता' इति तर्हि चैत्यवन्दनमात्रेऽपि तत्सूत्रमात्रप्रेरितायां पूर्वमेवेर्यापथिक्यां प्राप्तायां 'देवनरवराणां' देवाश्च नराश्च ये ते देवनराः, तेषु ये वराः प्रधानास्ते देवनरवरास्तेषां चैत्यवन्दनं 'कथं' केन प्रकारेण शुद्धं भवेत् ?, अयमर्थः–शक्रसूरिकाभादीनां देवविशेषाणां द्रव्यार्हत्स्थापनाऽर्हद्भावार्हदाद्यवस्थासु प्रणिपात-दण्डकस्याशुद्धत्वापत्तिः स्यात्, तेषु चित्तशुद्धिकारणभूताया ईर्यापथिकायाः प्रतिक्रान्तेः अश्रवणात्, राज्ञाश्च कूणिकादीनामपि प्रणिपात-दण्डकस्याप्यशुद्धत्वमेव स्यात्, न चैवं दृष्टमिष्टं वा, तेषामपि चैत्यवन्दनायाः शुद्धत्वेन प्रसिद्धत्वात्, अविरतानां प्रणिपातदण्डकोऽपि चैत्य-वन्दनं स्यात्, तथा च श्रीज्ञातांगविवरणे षोडशाध्ययने (२११ पत्रे) श्रीमद्गुरुचरणाः (श्रीअभयदेवसूरयो) निजगदुः ''किञ्च-अविरतानां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणिपातदण्डकमात्रमपि चैत्यवन्दना सम्भाव्यते, यतो वन्दते नमस्यतीति पदद्वयस्य वृद्धान्तरव्याख्यानमेवमुपदर्शितं जीवाभिगमवृत्तिकृता–विरतिमतामेव प्रसिद्धचैत्यवन्दनाविधिर्भवति, अन्येषां तथा अभ्युपगमपुरस्सरकायोत्सर्गासिद्धेः" इति. एतावताऽविरतानां कायोत्सर्गासिद्धौ 'व्यापकं व्यावर्त्तमानं स्वव्याप्यमप्यादाय निवर्त्तेत' इति न्यायात्कायोत्सर्गनिवृत्तिरीर्यापथिकीमपि निवर्त्तयति, ईर्यापथिकायाः व्याप्यत्वं, कायोत्सर्गस्याधिकवृत्तित्वाद्व्यापकत्वं, ईर्यां विनाऽपि षडावश्यकादौ पञ्चमाध्ययनरूपकायोत्सर्गश्रुतेः, ईर्यापथिकी तु कायोत्सर्गाव्यभिचारिणीति, तथा च तेषां चैत्यवन्दना विनाऽपि ईर्यां शुद्धेति भावः इति गाथार्थः।१४। न केवलमविरतानामेवेर्यां विना शुद्धत्वं चैत्यवन्दनायाः प्रत्युत यतीनामपि चैत्यवन्दनाया ईर्याप्रतिक्रमणमन्तरेणापि शुद्धत्वं समर्थयन्नाह–

**जिणगिहगयस्स जिणवं-दयस्स साहुस्स अणुवविठस्स। नियठाणगयस्स कहं ?, गमणागमणाण पडिक्कमणं।१५।**

व्याख्या–पाक्षिकादिषु 'जिनगृहगतस्य' जिनगृहे गतो यः स जिनगृहगतस्तस्य जिनगृहगतस्य 'जिनवन्दकस्य' जिनान् स्थापनार्हतः वन्दते इति जिनवन्दकस्तस्य, तथा भूतस्य'साधो'रनगारस्य 'अनुपविष्टस्य' स्नानादिदर्शनार्थं जिनगृहे अनिषेदुषस्तदानीं स्नानादेरसद्भावत्वादिहेतुना विश्राममकृतवतस्सतो 'निजस्थानगतस्य'स्वोपाश्रयमागतस्य गमनागमनयोः प्रतिक्रमणं कथमुक्तं ? इति योज्यं, तथा चागमः श्रीमद्व्यवहारभाष्यवृत्तिपीठिकायां (४० पत्रे) ''एमेवे''ति (११४ भा०) गाथाव्याख्यायां ''पाक्षिकादिषु जिनभवनादौ चैत्यवन्दको गत्वा यदा स्नानादिदर्शननिमित्तमैर्यापथिकीं प्रतिक्रम्य विश्राम्यति तदा केवलं गमनमेव प्रतिक्रमणीयं, ततः स्वोपाश्रये प्रत्यागतावागमनं. विश्रामणाभावे गमनागमनं प्रतिक्रमणीयमिति'' तथा च यदि साधुना चैत्यवन्दनात्पूर्वमेवेर्या प्रतिक्रान्ता भवेत्तदा तत्रैव गमनमप्यालोचितं भवेदेव, गमनाद्यालोचनस्येर्यायाः सहचरितत्वात्, तथा च स्वोपाश्रये समायातेनानेनागमनमेवालोचनीयं स्यान्न गमना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमनं, गमनस्य जिनभवने एवालोचितत्वेन कल्पमानत्वादुक्तं तु गमनागमनालोचनमेवेति बहुविमृश्यं, साधूनामपि त्यक्तसंगत्वेन चेतःशुद्धिरूपतया कृत्यफलाभिकांक्षावत्त्वात्, यथा साधोस्तथा देशविरतानामपि पौषधादिषु स एव विधिरिति, तदेवमविरतिसम्यग्दृष्टीनां विरतानां विरताविरतानां च ईर्यापथिकीं विनाऽपि चैत्यवन्दनस्योपलभ्यमानत्वात्सिद्धान्तवाक्यानां महानिशीथवाक्येन सह भवदुक्त्या विरुद्धता स्यात्, न च तेषां विरुद्धत्वं, तस्मान्महानिशीथवाक्यं चैत्यवन्दना विशेषपरं, न सामान्यचैत्यवन्दना परमिति।१५। एवं महानिशीथवाक्यस्यान्यग्रन्थैः सह तदभिप्रायेण विरुद्धतामुद्भाव्य साम्प्रतं पुनस्तदभिप्रायेण परस्परं महानिशीथवाक्यैर्विरोधमाविर्भावयन्पूर्वपक्षिणं शिक्षयितुमाह–

**किंचिवि सद्देण इह, जइ गहियं धम्मकिच्चमविसेसं । ता उवहाणं पढमं, इरियापाढं विणा कहन्नु ।१६।**

व्याख्या–'यदि'इति पूर्वपक्षोद्बोधकवाक्यं, यदि'इहे'ति श्रीमहानिशीथे 'किंचिवि सद्देण'त्ति "न कप्पइ चेव काउं किंचिवि चियवंदण" इत्यादिवाक्ये "किंचिवि" शब्देन सर्वमपि धर्मकृत्यं 'अविशेषं' विशेषनिरपेक्षं यथास्यात्तथा यदि भवदुक्त्या गृहीतं स्थविरैरिति विशेषः,'ता' इति तर्हि 'प्रथम'माद्य'मुपधानं' तपोविशेषस्तत्रैव'नु'इति वितर्के. ईर्यापाठं विना 'कथं' कथमपि घटते ?, न घटत इत्यर्थः, परस्परविरोधात्, यदि ईर्यापथिकीं प्रतिक्रमणं विना निर्विशेषं न किमपि शुद्ध्येत्तर्हि ईर्यापथिक्या अध्ययनं विना कथं (नमस्कार) प्रथमोपधानविधानं तत्रैव ग्रन्थे प्ररूपितं ?, उपधानस्य विशिष्टक्रियावत्त्वादिति भावः, साम्प्रतं स्वस्वगुरुसम्प्रदायविशेषादुपधानादितपसां विसदृशक्रियाकलापोपलब्धावपि श्रीमहानिशीथसिद्धान्ते तस्मिन्नेव तृतीयाध्ययने एवमेव सप्रपञ्चमुक्तं, तद्यथा–"से भयवं ! एवं जहुत्तविणओवहाणेणं पंचमंगलमहासुअक्खंधमहिज्जित्ताणं पुव्वाणुपुव्वीए अणाणुपुव्वीए सरविंजणमत्ताबिंदुपयऽक्खरविसुद्धं थिरपरिचियं काऊण महया महया पबंधेणं सुत्तऽत्थं च विन्नाय तओ णं किमऽहिज्जिज्जा ?, गोयमा ! ईरियावहियं, से भयवं ! केणं अट्ठेणं एवं वुच्चइ ?, जहा–पंचमंगलमहा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुअक्खंधमऽहिज्झित्ताणं पुणो ईरियावहियं अहिएज्जा'' इत्यादिवाक्येन सह सर्वकृत्येष्वीर्यापूर्वकत्वप्रतिपादकसूत्रं भवदभिप्रायेण विरुद्धतामाप्नोति, अयं भावः–यदि ईर्याप्रतिक्रमणमन्तरेण सर्वमपि करणीयमकरणीयं भवेत्तदोपधानप्रत्याख्यानस्वाध्यायकृत्यं नमस्कारपठनविधावधीतमविधिपूर्वकत्वेनाकरणीयमेव भवेत्, नमस्कारोपधानविधानादन्वेवेर्यापथिकीपाठाध्ययनस्य प्ररूपितत्वात्, अनधीतायां तस्यां नमस्कारोपधानवहने कथङ्कारं सर्वकृत्येषु तत्पूर्वकता भवेत्?, सति धर्मिणि धर्मचिन्तायाः समुचितत्वात्, महापुरुषप्ररूपितग्रन्थेषु पूर्वापरविरोधाभाव एव "अप्पऽक्खरमसंदिद्धं, सारवं विस्सतो मुहं । अत्थोभमऽणवज्जं च, सुत्तं सुत्तविउ विऊ ।१।" इति वाक्यात्, यदिवा "अपडिक्कंताए ईरियावहियाए" इति वाक्यं भवदुक्त्या विशेषं–प्रतिव्यक्तिविषयं भवेत्तदाऽनेन सूत्रेण सह विरुद्धता भवेत्, अस्माभिस्तु व्यक्तिविशेषविषयित्वेन तद्वाक्यस्याङ्गीकारान्न विरोधगन्धोऽपि समुपलब्धः, तथा चैतस्मिन्साधारणे सूत्रे विद्यमानेऽपि यत्र विशेषे विधिसूत्रे पूर्वमीर्योक्ता तत्रैव सा पूर्वं प्रतिक्रमणीया, यत्र तु तस्याः पश्चात्प्रतिक्रमणमाविष्कृतं तत्र पश्चादेव प्रतिक्रमणीया, न चेदमीयसाधारणसूत्रेण पश्चात्प्रतिपादिताऽपि ईर्याऽत्र निवार्येति भावः ।१७। अथावश्यकबृहद्वृत्त्यादिबोधित"पच्छा ईरियावहियाए पडिक्कमइ" इति वाक्यस्यार्थान्तरकरणेन श्रीमहानिशीथवाक्येन सह विरोधो निवार्य इति पूर्वपक्षीयवासनामपास्तुमाह–

**अहवा गमणनिवित्ती, रूवो अत्थो य अभिनिवेसकओ । बालाणं चिय चित्तं, रंजइ इरियापडिक्कमणे ।१८।**

व्याख्या–'अथवे'ति पक्षान्तरे, "पच्छा इरियावहियाए पडिक्कमइ" इति वाक्येऽधिकरणे गमननिवृत्तिरूपो अभिनिवेशकृत, 'अभिनिवेशेन' कदाग्रहेण कृतोऽभिनिवेशकृतोऽर्थो 'बालानामेवा'ल्पमेधसामेव चित्तं रञ्जयति, न विवेचकानां प्रतिभाभास्वत्प्रभाऽपहस्तितदुर्विदग्धमुग्धपेचकानामित्यक्षरार्थः, स्वरूपार्थश्चायं–यदावश्यकवृत्त्यादौ "पच्छा ईरियावहियाए पडिक्कमइ" इति वाक्यं तत् "जइ चेइयाइं अत्थि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तो पढमं चेइयाइं वंदइ" इति बोधितचैत्यान्तरगमनादन्वायातस्योपासकस्य मार्गगमनक्रियानिषेधपरं, न तु महानिशीथग्रन्थोक्तचेतःशुद्धिविधानरूपफलजनकेर्यापथिकीनिषेदकं, इति वाक्येन ईर्यापथिकायाः गमननिवृत्तिरूपोऽर्थः प्रवर्त्तितस्तृतीयमिथ्यात्वोदयमेव व्यनक्ति तत्कर्तुः, तस्मिन्नभिनिवेशस्तु सर्वजनप्रतीत एव, अभिनिवेशतोऽदृष्टाऽश्रुतार्थकथने तस्य अनायासेनापि सिद्धेः, वीरजिनजामातृजमालेरिव, यदागमः—"आयरियपरंपरएण, आगयं जो उ आणुपुव्विए। लोवेइ छेयवाई, जमालिनासं स नासिहि त्ति ।१। (स एवं'छेकवादी'निपुणोऽहमित्येवं वादी पण्डिताभिमानी जमालिनिन्हववत् सर्वज्ञमतविकोपको विनंक्ष्यति अरहट्टघटीयन्त्रन्यायेन संसारचक्रवाले बंभ्रमिष्यति)" नवीनार्थकरणेन परंपरायातार्थापलपनेन जिनाऽऽशातनाया अपि भावात्, तथा युक्तमेवाभिनिवेशिकत्वं स्वमतानुरागीणामिति ।१८। ननु श्रीपञ्चाशकयोगशास्त्रवृत्त्यादौ "पश्चादीर्यापथिकायाः प्रतिक्रामति" इति पञ्चम्यन्तप्रयोगदर्शनाद्गमनादिव्यावृत्तिरूपार्थापत्तौ नाभिनिवेशिकत्वं भविष्यति इत्याह—

न य पंचमी विभत्ती, सत्थविरोहेण बाहए इरिअं। अन्नंच पच्चयऽत्थो, विस्सरिओ तुह पाढियस्सावि ।१९।

व्याख्या—"पश्चादीर्यापथिकायाः प्रतिक्रामति" इत्यत्र पञ्चमीविभक्तिर्गमनव्यावृत्तिरूपार्थसमर्थनेन 'ईर्यां'महानिशीथोक्तार्थां,ईर्यापथिकीं 'न बाधते' न बाधाविषयी करोति, केन हेतुना ?, इति हेतुमाह—'शास्त्रविरोधेन' शास्त्रैः सह यो विरोधः स शास्त्रविरोधस्तेन शास्त्रविरोधेन, अयमर्थः—शास्त्रेषु तेषु तेषु प्रस्तावेषु पञ्चमीविभक्त्याऽपि समभिलषितार्थैवेर्या बोधिताऽस्ति, तद्यथा—"तओ सो पणओ 'सामि ! करिस्सं जत्तं'ति उवगतो सिवकुमारसमीवं, निसीहियं काऊण इरिआए पडिक्कंतो दुवालसावत्तं किइकम्मं काऊण पमज्जिऊण 'अणुजाणह मे'त्ति आसीणो" इत्यादि श्रीसङ्घदासगणिकृतवसुदेवहिण्डिप्रथमखण्डे (मुद्रिते २४ पत्रे), अत्र पञ्चम्यामप्युक्तार्थैवेर्या बोध्या, न तु गमनव्यावृत्ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपार्था, पञ्चम्या द्वादशावर्त्तवन्दनरूपकार्ये एतस्या एवेर्यायाः समुचितत्वात्, तथा ''एगंतमवक्कमित्ता, अचित्तं पडिलेहिय। जयं परिट्ठवेज्जा, परिट्ठप्प पडिक्कमे। (दश० ५-१-८६ व्या०)-अचित्तं नाम जं सत्थोवहयं अचित्तं, तं च आगमणथंडिलादी, पडिलेहणाए गहणेण पमज्जणा वि गहीया, चक्खुणा पडिलेहणा रयहरणादिणा पमज्जणा, जयं णाम अतुरिअं, अप्पक्खोडेंतो विहिणा तिण्णि पुंजे काऊण 'वोसिरामि'त्ति उच्चारेत्ता परिट्ठवेज्जा, परिट्ठवेऊण उवस्सयमागंतूण इरियावहियाए पडिक्कमेज्जा'' इति दशवैकालिकचूर्णौ (१८६ पत्रे), तथा ''जइ दो वच्चंता ता तिन्ह परिमाणेण गिण्हिज्जइ, अह बहवे ताहे अपरिमिअं गिण्हिज्जा, घित्तूण आगओ बाहिं पडिलेहित्ता पमज्जित्ता दंडयं ठावित्ता इरियावहियाए पडिक्कमित्ता आलोएत्ता दाएत्ता पुणो वि आपुच्छति'' इति श्रीहारिभद्रीयपञ्चवस्तुकवृत्तौ (६५पत्रे) तथा ''इरियावहिया हत्थं-तरेवि मंगलनिवेयणा समयं'' इति व्यवहारभाष्य (७ उ० ३५७) गाथाव्याख्यायां श्रीमलयगिरयः ''आगत्य हस्ताभ्यन्तरेऽप्यैर्यापथिक्याः प्रतिक्रान्तव्यं, मुखपोतिका प्रतिलेखनानन्तरं वन्दनकं दातव्यं, ततः 'शुद्धः काल' इति मङ्गलनिवेदनं कर्त्तव्य''-मिति (६३ पत्रे), तथैवैतद्भाष्यगाथैकदेशव्याख्यायां व्यवहारचूर्णावपि ''इरियावहियाए हत्थंऽन्तरे वि पडिक्कमियव्वं'' एवं बहुषु स्थानेषु पञ्चमीविभक्तावप्यस्मदभीष्टार्थैर्यापथिका समवसेया, गीतार्थसम्मतत्वात्, तथा च (धर्मसागरीयेर्यापथिका २२ पत्रे) ''द्वितीयान्तप्रयोगेणाप्युक्तार्थानपाये'' इत्यपि पूर्वपक्षिवाक्यमपास्तं द्रष्टव्यं, तुल्ययोगक्षेमत्वात्, ननु पञ्चाशकविवरणे ''पश्चादीर्यापथिकायाः'' इति पञ्चम्यन्तपदं गमनार्थं विना प्रतिक्रामतीति पदेन सह विरोधभावमासादयत्तमर्थमनुमापयतीति चेन्न, अभिप्रायापरिज्ञानात्, नहि ईर्यापथिकायाः महानिशीथोक्तायाः 'प्रतिक्रमणं' निवर्त्तनमित्येवम्भूतो विपरीतार्थसाधनिरूपणात्मकोऽभिप्रायो ह्यर्थान्तरमनुमापयति, पूर्वार्थबाधेऽर्थान्तरकरणस्य न्याय्यत्वात्, न च पूर्वार्थे कोऽपि बाधस्तथाहि-''ईरणमीर्या-गमनं, तद्युक्तः पन्था ईर्यापथस्तत्र भवा ऐ(ई)र्यापथिकी विराधना-जन्तु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बाधा, मार्गे गच्छतां या काचिद्विराधना भवति सा ईर्यापथिकीत्युच्यते" इति श्रीदेवेन्द्राचार्यकृतायां वन्दारुवृन्दारकादिकायां षडावश्यकवृत्तौ (१४ पत्रे), तथा "अथ तत्र वा ईरणमीर्या—गमनमित्यर्थस्तत्प्रधानः पन्था ईर्यापथस्तत्र भवा ऐर्यापथिका, अथवा पथि जाता पथिका, ईर्यायां ईरणे वा पथिका ईर्यापथिका तस्यां, तथा गच्छतः पथि या काचिद्विराधना जाता भवति सा ऐर्यापथिकेत्युच्यते" इति श्रीश्रीचन्द्र-सूरिकृतषडावश्यकवृत्तौ नयनयुगनेत्रेन्दु (१२२२) वर्षकृतायां, तथा "आवस्सियाइ थंडिलदेसं गंतूण काइयं काऊण निसीहियं भणंतो पविसइ, इरियं पडिकमइ" इति सूत्रं, तत्र "प्रविष्टः सन् ईर्यापथिकीं प्रतिक्रमति, तत्र 'ईरणं' ईर्या—गमनं, तद्युक्तः पन्था अपि ईर्यापथः, तत्र भवा ईर्यापथिकी विराधना—जन्तुबाधा, मार्गे गच्छता या काचिद्विराधना भवति सा ईर्यापथिकी उच्यते" इति यतिदिनचर्यावृत्तौ, एवं स्थाने स्थाने ईर्यापथिकीव्याख्यानावसरे मार्गजनितविराधनाया एवेर्यापथिकीति विशेषणमासाद्यते, अत 'ईर्यापथिकायाः' मार्गजनितविराधनायाः प्रतिक्रामतीति सम्यगेवार्थसङ्गतिर्न कोऽपि दोषः, 'अन्नंच' त्ति अन्यच्च 'प्रत्ययार्थः' भवाद्यर्थिकप्रत्ययस्यार्थः तत्र पाठितस्यापि 'विस्मृतः' स्मृतिगोचरमतीतः पूर्वपक्षं विवक्षोरिति शेषः, अयं भावः—ईर्यापथे भवा ईर्यापथिका इति भवाद्यर्थिकप्रत्ययस्य त्वदुक्तार्थविपक्षस्य जागरूकत्वेऽपि भवता प्रत्यायार्थनिरपेक्षतयैवोच्यते, न च कुत्राप्यागमे ईर्यापथिकायाः गमनादिरूपोऽर्थः समवसितः, (तत्) प्रत्ययेन गमनादि भवायाः एव कस्याश्चिद्बोधनात्, तथा चेर्यापथिकेति विशेषणपदमनुक्तमपि विराधनारूपं विशेष्यपदमवगमयति, इतरथा 'इच्छाकारेण संदिसह भगवन्! इरियावहिअं पडिक्कमामि' इति क्षमाश्रमणे (न मार्गितआदेशे) किमाश्रयणीयं स्यादर्थोपपत्तावित्यपि चिन्त्यं. तथा चैवम्भूतः प्रत्ययार्थो यदि स्मृतिविषयमुपगतो भवेत्तदैवम्भूताऽऽकस्मिकार्थकल्पना न विहिता भवेत्, ततः प्रत्ययार्थो विस्मृत एवेति सम्भावना।१९। ननु अस्मदुक्तयुक्तीनां युक्तानां विद्यमानत्वेऽपि महानिशीथवाक्यस्यास्मत्पूर्वजैः सर्वधर्मकृत्येषु साधारणत्वमेवाङ्गीकृतमिति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गतानुगतिकत्वेनास्माभिरप्यनन्यगतयाऽर्थान्तरमुररीकृतमिति विपक्षस्य वाक्यमदृढमूलतानिरूपणपूर्वकत्वेन कुशकाशावलम्बनप्रायं दर्शयितुमाह-

सुत्तं विसेसविसयं, लिहिअं गंथेसु तुम्ह सूरीहिं। ता इरिआवहिआए, कहमऽत्थो घडइ निम्मूलो।२०।

व्याख्या-'सुत्तं'ति श्रीमहानिशीथसूत्रपदं "अपडिक्कंताए इरिआवहिआए" इत्यादिरूपं 'युष्माकं सूरिभिः' युष्मत्पूर्वाचार्यैः 'ग्रन्थेषु' निजनिजग्रथितशास्त्रेषु विशेषविषयं 'लिखितं' लिपिसात्कृतं, युष्मदुक्त्या तत्सूत्रस्य प्रतिव्यक्तिनिर्विशेषतया वादकैरपि व्यक्तिविशेषविषयितया तत्सूत्रं त्वत्पूर्वजैर्निवेदितमिति भावस्तथाहि-"अत्र च सम्प्रदायादुत्कृष्टचैत्यवन्दनेर्यापथिकी प्रतिक्रमणपुरस्सरं विधेयेत्यतः सैवादौ व्याख्यायते" इति षडावश्यक(वन्दारु)वृत्तौ (१३ पत्रे) दिनकृत्यबृहद्वृत्तौ च देवेन्द्राचार्याः, तथा "सम्पूर्णायामस्यां क्रियमाणायां पापक्षपणादीन्यष्टौ फलानि स्युः, यदत्रेर्यापथिक्या अपि फलमुपदर्शितं तदीर्यापथिकीप्रतिक्रमणपुरस्सरैव प्रतिपूर्णा चैत्यवन्दनेति प्रतिपादनार्थं" इति चैत्यवन्दनभाष्यवृत्तौ (३ पत्रे) युष्मत्पूर्वजाः सोमसुन्दरसूरयः, तथा "यदत्रैर्यापथिक्या अपि फलमुपादर्शि तदीर्यापथिकीप्रतिक्रमणपूर्विकैव परिपूर्णा चैत्यवन्दनेति प्रतिपादनार्थं" इति तावत्प्रोक्तं, पुनरप्यग्रे "वृद्धाः पुनरेवमाहुः उत्कृष्टा चैत्यवन्दना ईर्यापथिकीप्रतिक्रमण-पुरस्सरैव कार्या, अन्यथाऽपि जघन्या मध्यमेति" इति श्रीचैत्यवन्दनभाष्यवृत्तौ श्रीदेवेन्द्रसूरिशिष्यमहोपाध्यायधर्मकीर्तिकृतायां सङ्घा-चाराभिधानायां १३० पत्रे, एवं युष्मत्पूर्वजैरपि यदि महानिशीथवाक्यं निर्विशेषं सर्वकृत्येषु प्रतिव्यक्तिसाधारणं समवगतं स्यात्तदा स्वकीयग्रन्थेषु सर्वचैत्यवन्दनासु साधारणतया स्वीकृताऽपीर्यापथिकी परिपूर्णायामुत्कृष्टचैत्यवन्दनायामेवेति सावधारणवाक्यं नोक्तं स्यादुक्तं च तैः, 'ता' इति तर्हि "इरियावहियाए" इति पञ्चम्यन्तपदे 'निर्मूलो' गुरुपारम्पर्याभावान्मूलशून्यो गमनव्यावृत्तिरूपोऽर्थः कथं 'घटते' घटामास्कन्दति ?, अयम्भावः-श्रीमहानिशीथसूत्रवाक्यस्य निर्विशेषत्वसाधनाय असाधीयानपि नव्योऽर्थः कल्पनागोचरीकृतः, तस्मिंस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सविशेषत्वं गुरुभिराद्दतमित्यायातोऽयं ''घटकुट्यां प्रभात''मिति न्यायः इति गाथार्थः ।२०। ननु सामायिकेऽपि चेतःशुद्धितारूपफलकल्पनया आवश्यकवृत्त्यादावनुक्तापि पूर्वमीर्या भविष्यति इत्याशङ्कामपाकुर्वन्नाह–

कहियं इरियावहिअं, अकहंतो अकहिअं पकप्पंतो । सामाइअपत्थावे, मूढो अंधं विसेसेइ ।२१।

व्याख्या–'सामायिकप्रस्तावे' नवमव्रतरूपसामायिकाधिकारे ''पच्छा इरियावहियाए पडिक्कमइ'' इत्यावश्यकबृहद्वृत्त्याद्यक्षरैः कथितामीर्यापथिकीं गमनव्यावृत्तिरूपार्थसमर्थनेनाकथयन् 'अकथितां'सामायिकाधिकारे केनाप्यनिरूपितामीर्यापथिकीं पूर्वं'(प्र)कल्पयन्'(प्रकर्षेण) कल्पनागोचरीव कुर्वन्'मूढ'इति मूर्खः 'अन्धं' चक्षुविकलं'विशेषयति' अन्धादपि स मूर्खोऽतिरिच्यते, अयम्भावोऽत्र–यस्त्वन्धः स वर्त्तमानमग्रेन्यस्तं वस्तुं न पश्यति असदपि न पश्यति. अयं तु मूर्खः सद्रूपामीर्यापथिकीं न पश्यति असद्भूतामीर्यां च दृग्गोचरीकुरुत इति, तस्मादयं सातिशय इत्याशय इतिगाथार्थः, भावार्थस्त्वयं–तेषामयमभिप्रायः–ननु सामायिकेऽपि शुद्धिपूर्वकत्वमनुमतमिति कथं तस्यापि न तत्पूर्वकतेति चेत्तन्न, आरोपे सति निमित्तानुसरणं, न तु निमित्तमस्तीत्यारोप इति, तान्त्रिकाम्नातादेतत्प्रश्नितमप्राश्निकत्वमेव व्यनक्ति, न व्यक्तत्वं, न चानुक्ताऽपि सामायिकाधिकारे ईर्या यत्पूर्वं तेनैव हेतुनाऽनुमास्यते इति (वाच्यं)चेन्न, तथा सति श्रीमदावश्यकविवरणादिग्रन्थेषु कृतसामायिकस्यानृद्धिप्राप्तस्य साध्वादिसमीपे पुनः साधुसाक्षिकसामायिककरणव्यतिकरे ईर्याप्रतिक्रमणानन्तरमेवागमनालोचनं कथं न्यस्तं भवेत् ?, यदीर्या सामायिकदण्डकात्प्रागेव भवदुक्त्या तेन प्रतिक्रान्ता तदा गृहादागमनमपि तदैवालोचितं, हस्तशतात्परतः समागमने ईर्यागमनालोचनयोः सम्मिलितयोरेव सद्भावात्, तथा च सति सामायिकदण्डकपाठादनु पाठसिद्धेर्यापथिकीप्रतिक्रमणादन्वेवागमनालोचनं शास्त्रोक्तं कथं घटते ?, पुनर्गमनालोचनकारणभूतस्थानान्तरगमनागमनानुपलम्भादिति भावार्थः, नन्वावश्यकचूर्ण्यभिप्रायेण



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चैत्यादिगमननैमित्तिकैर्याप्रतिक्रान्तिसत्कमेवागमनालोचनं, तच्छुद्धि निमित्ता त्वीर्या गमनालोचनयुक्ता पूर्वमेवानुमतेति चेन्न, पूर्वमेव दत्तोत्तरत्वात्, अत्र सामाचारीविशेषादिरूप एव विशेषः, यदिचूर्णिकाराभिप्रायवदन्येषामप्यावश्यकवृत्तिकारादीनां तथाऽभिप्रायोऽभविष्यत्तदा तेऽपि इत्थमेवालिखिष्यन्, ततः सामाचारीविशेषादिरूप एव तदभिप्रायनिबन्धनं, अपरञ्च यदि पाठसिद्धेर्याप्रतिक्रमणं तदानन्तरिकमागमनालोचनं च चैत्यगमनागमननिमित्तकं स्यात्तदा नवपद(प्रकरणस्य)विवरणे ईर्याप्रतिक्रमणादनु "जइ चेइयाइं अत्थि तो पढमं चेइयाइं वंदइ" इति पाठसिद्धं न भवेत्, निमित्ताभावे नैमित्तिकस्याप्यभावात्, ईर्यापथिक्याः पाठसिद्धायाश्चैत्यवन्दननैमित्तिकत्वस्वीकारात्, अत्र तु नैमित्तिकस्य निमित्तपूर्वकता दुष्करेति कफोणिगुडास्वादनप्रायमेव निमित्तनैमित्तिकत्वमनयोरिति दिक्, अपरञ्च नवपदप्रकरणबृहद्विवरणकारेणैतत्प्रश्नावकाश एवाकाशकुशेशयीकृतस्तद्यथा "चैत्यगृहे तु यदि साधवो न सन्ति तदैर्यापथिकीप्रतिक्रमणपूर्वमागमनालोचनां विधाय चत्यवन्दनां करोति, ततः पठनादिविधत्ते, साधुसद्भावे तु पूर्व एव विधिः" इति वाक्येन चैत्यगृहे साधुसद्भावेऽन्यत्र गमनाभावेऽपि ईर्याप्रतिक्रमणादन्वेवागमनालोचनं "पूर्व एव विधि"रिति वाक्यादाविष्कृतं, चैत्यानां समिपवर्त्तित्वेनान्यत्र गमनासम्भवात्तेन पाठसिद्धेर्या आगमनालोचनं च गृहादागमननिमित्तकमेव, न चैत्यान्तरगमननिमित्तकं, आवश्यकचूर्णिकृताऽपि समीपस्थचैत्यवन्दनैव बोध्यते, न तु स्थान्तरस्थचैत्यवन्दना, न च साधोः समीपे चैत्यानवकाश इति वाच्यं, 'यदि'इति पदेन कादाचित्कत्वस्यैव सूचनं, इतरथा सार्वदिकत्वे 'यदि' इति पदं चूर्णिकृन्नालिखिष्यन्, कदाचित्तु तथाऽपि सम्भवात्, यदुक्तं व्यवहारचूर्णौ—"जइ चेइयघरे ठिया वियालियं कालं पडिक्कंतो अकए आवस्सए गोसे कए आवस्सए जइ चेइए न वंदइ ता मासलहू" इत्यादि, तथा च न तेन पूर्वमीर्याप्रतिक्रान्ता न चागमनमालोचितमिति, तेन सूक्ष्मेक्षिकया शुद्धिनिमित्तेर्यायाः सामायिकदण्डकपाठात्पूर्वं यत्प्रतिक्रमणानुमानं तद्गर्भश्रावेणेव गतं, तथा पाठसिद्धेर्यायाः

For Private And Personal Use Only

'प्रतिक्रामती'त्यस्य 'बइसणं संदिसावेमि, बइसणं ठाएमि' इति यत्कल्पनं तदप्यसज्जल्पनं, यदि ईर्यापथिकायाः क्वाप्यागमे गमनार्थता भवेत्तदा 'प्रतिक्रामती'ति पदेन सह गमननिवृत्तिरूपार्थसम्पत्तेस्तत्कल्पनं स्यात्, न चैवं दृष्टमिष्टं वा शिष्टानां, तस्मात् "पच्छा इरियावहियाए पडिक्कमइ" इति पदं महानिशीथोक्तेर्यापथिकी निरूपकं, न निजमानसिककल्पनाविषयीकृतार्थस्थानकं, ननु यदि न भवेदस्मत्कल्पितोऽर्थस्तदा सकलगच्छसामाचारीप्रसिद्धानां 'बइसणं संदिसावेमि' इत्यादिक्षमाश्रमणानां का गतिरिति चेन्न, "पडिलेहित्ता णिविट्ठो पुच्छइ पढइ वा" इत्यादिभिः श्रीमदावश्यकवृत्तिचूर्ण्यादिवाक्यैरेव चरितार्थत्वात्, तद्यथा-"आणाए तवो आणाए, संजमो तह य दाणमाणाए" इति स्थविरवाक्येन गुरोराज्ञां विनाऽवस्थानं स्वाध्यायश्च कृतसामायिकस्य न शुद्धचेतां, तथा च तच्छुद्धचै 'बइसणं संदिसावेमि, बइसणं ठाएमि' इति क्षमाश्रमणद्वयमुपविशनपदग्रहणेन सूचितं, 'सज्झायं संदिसावेमि, सज्झायं करेमि' इत्येवम्भूतक्षमाश्रमणद्वयं "पृच्छति पठति वे"ति पदाभ्यां सूचितं, तथा च समञ्जसमिति गाथार्थः ।२१। अथ गुडजिह्विकया पूर्वपक्षिणं प्रत्याह-

**तुह वयणेणं इरिया, पुव्विं पच्छा व सव्वगीयाणं । सामाइअपत्थावे, कारणभूआ वि णो सरिआ ।२२।**

व्याख्या-हे पूर्वपक्षिन ! 'तव' भवतो 'वचनेन' अनन्तरोक्तेन वाक्येन 'सव्वगीयाणं'ति सर्वे च ते गीताश्च सर्वगीतास्तेषां सर्वगीतानां-सर्वगीतार्थानां, एकस्य गीतार्थस्य कर्हिचित्पठनपाठनादिकृत्यविहस्ततया विधेयस्य विस्मृतिरपि भवेदिति तद्व्यावृत्त्यै 'सर्व' इति पदं सप्रयोजकं, 'पूर्व'मिति सामायिकदण्डकादादौ 'वा' अथवा 'पश्चात्'सामायिकदण्डकानन्तरं 'सामायिकप्रस्तावे' नवमव्रताधिकारे 'कारणभूताऽपि' सामायिकस्वाध्यायादिकार्ययोर्भवदभिप्रायेण क्रमात्साधनभूताऽपि 'ईर्या' समयप्रसिद्धक्रियाविशेषरूपा 'न स्मृता' न स्मृतिगोचरं गतेति गाथाऽक्षरार्थः, भावार्थस्त्वयं-तवाभिप्रायेण सामायिकदण्डकपाठात्पश्चात्पाठसिद्धेर्या गमनव्यावृत्तिसूचिका, पूर्वं तु सामायिका-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्भवता अनुमता न तु तैर्लिखितेति पूर्वमपि सामायिकात्सा विस्मृता पश्चादपि विस्मृता सर्वेषामपि गीतार्थानामिति, तथा च यदि सा सामायिकस्य कारणतया तेषां विदिताऽभविष्यत्तदा तत्पूर्वं सा तैर्विस्मारिता नाभविष्यत्, न हि घटादिकार्योत्पत्तिवाचकः कुम्भकारादिरादौ मृत्पिण्डमेव विस्मारयति, तदुत्पत्तेस्तदधीनत्वात् , विस्मारिता च तैस्तवाभिप्रायेण सा, तथा सामायिकदण्डकात्पाश्चात्याऽपि स्वाध्यायादि-कारणभूताऽपि महानिशीथोक्तेर्यापथिकी तवाभिप्रायेण तैर्विस्मारिता, पाठसिद्धायास्तस्यास्त्वयाऽर्थान्तरकरणादिति केसरिकिशोरवदन-विवरान्तरगतदंष्ट्राङ्कुरापकर्षणमिव महानर्थनिबन्धनमेतदर्थसमर्थनं, अस्मदभिप्रायेण तु न काऽपि क्षतिः, सामायिकात्पूर्वं तु सामायिकं प्रति कारणत्वाभावादेव तस्या अनिबद्धत्वं स्वाध्यायादिकृत्यानां तदपेक्ष्यत्वात्पूर्वमीर्यायाः साक्षादेव निबद्धत्वमिति सर्वमपि साधीयः, इत्यनेन सङ्कल्पमात्रकल्पितकामधेनुरिवाविद्यमानाऽपि कल्पनामात्रगोचरीकृता सेर्यापथिकी शुद्धिपयसा गात्रपयःपात्रीं साधु पूरयिष्यति इत्यपि विचार्यं इति गाथार्थः ।२२। ननु सर्वगच्छेषु श्राद्धैः सामायिके पूर्वमेव साम्प्रतमीर्या प्रतिक्रम्यते परम्परया, तेन तेषां पूर्वाचार्याणामपि सामायिकाधिकारे तथैवेर्यापूर्वकत्ववाचकत्वमस्माभिरनुमास्यत इत्याशयमपाकुर्वन्नाह–

**मुहपोत्ती पडिलेहण–पुव्वं सामाइअं भणंताणं । ताणं कहमऽणुमिज्जइ, कहणिज्जं सड्ढचरिएणं ।२३।**

व्याख्या–'सड्ढचरिएणं'ति श्राद्धानां–तद्गच्छीयोपासकानां, चरितं–अनुष्ठानं श्राद्धचरितं, तेन श्राद्धचरितेन साधनभूतेन 'ताणं'ति तेषां, प्रस्तावात्तत्पूर्वजानामाचार्याणां 'कथनियं' प्ररूपणां 'कथ'मिति केन प्रकारेण 'अनुमीयते' अनुमानविषयी क्रियते ?, युष्माभिरित्यनुक्तोऽपि कर्त्ता क्रियाया आक्षिप्यते, कथम्भूतानां तेषां ? मुखपोतिकाप्रतिलेखनपूर्वं सामायिकं 'भणतां' कथयतामिति गाथार्थः, स्वरूपार्थं-स्त्वयं–श्रीमदुकेशगच्छीयश्रीमत्ककुदाचार्यसन्तानीयश्रीयशोदेवोपाध्यायैर्नवपदविवरणे (२४३ पत्रे) सामायिकस्य विधिं प्ररूपयद्भिरिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साक्षादेवोक्तं, तद्यथा "मुखवस्त्रिका प्रत्युपेक्षणपूर्वं च सर्वत्र सामायिकं साध्वादिसमीपे विधिना ग्राह्य"मिति. अनृद्धिप्राप्तस्य श्राद्धस्य पुनः साधुसमीपे सामायिकमङ्गीकुर्वतोऽयं विधिः, तथा (२४४ पत्रे) "यथासम्भवं साधुसमीपे मुखपोतिकाप्रत्युपेक्षणपूर्वं 'करेमि भंते ! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामी'त्याद्युच्चार्येर्यापथिकीं प्रतिक्रम्य यथारात्निकतया सर्वसाधूं-श्चाभिवन्द्य प्रच्छनादि करोति" इति वाक्याच्च पूर्वमकृतसामायिकस्यापि ऋद्धिप्राप्तश्राद्धस्य सामायिककरणविधौ तत्रैव वृत्तौ पुनरप्ययं विधिरुक्तः, तथा च त्रिसप्तत्यधिकसहस्रवर्षे श्रीदेवगुप्तसूरिविरचिताऽपरचिरन्तननवपदप्रकरणस्वोपज्ञलघुविवरणेऽपि (४२ पत्रे) "प्रथमं साध्वादिसमीपे मुखवस्त्रिकां प्रत्युपेक्ष्य विधिना सामायिकं करोति" इति वाक्याच्चानृद्धिप्राप्तस्य सामायिकविधौ साधुसमीपेऽयमेव विधिः, एवं मुखवस्त्रिकाप्रत्युपेक्षणपूर्वकमेव सामायिककरणमुभाभ्यां साक्षादेवोक्तं, नेर्यापथिको प्रतिक्रमणपूर्वकमिति, तथा चेदानीन्तनश्राद्धाचरणेन कथं तेषामाशयानुमानं भवेत् ?, नन्वियं मुखपोतिका प्रतिलेखनोपकरणप्रतिलेखनामध्यगता भविष्यति, न सामायिकनिमित्तका, मुख-वस्त्रिकापादप्रोञ्छनप्रतिलेखनायाः सामायिकपूर्वकत्वमस्माकमप्यभिमतमिति चेन्न, अहो यौक्तित्वं !!, उपकरणप्रतिलेखनामन्तरेण गृहे कथं तेन सामायिकं कृतं भविष्यति ?, गृहे कृतसामायिकस्य गुरुसमीपमायातस्य सामायिककरणविधिरप्यत्रोपात्त एव, न केवलमकृत-सामायिकस्यर्द्धिप्राप्तस्यैव, तस्मान्निर्णीतमेतद्यत्कृतसामायिकस्यैतन्मुखपोतिकाप्रतिलेखनं नोपधिप्रतिलेखनामध्यगतं, किन्तु सामायिक निमित्तकं एव, "एकत्र दृष्टो न्यायः सर्वत्रोपयोगी भवती"ति न्यायादृद्धिप्राप्तस्यापि पोतिकाप्रतिलेखनं सामायिकग्रहणनिमित्तकमेव, नोपकरणप्रतिलेखनामध्यगतं, तुल्ययोगक्षेमत्वात् , अन्यथा त्वीर्यावत्पूर्वमुक्ता स्यात् , तत्पूर्वकत्वात्तस्याः, तस्मात्सामायिकं मुखपोतिका-प्रत्युपेक्षणपूर्वकमेव नेर्यापथिकीप्रतिक्रमणपूर्वकं ग्राह्यं, यदि च सामायिकमीर्यापथिकीप्रतिक्रमणपूर्वकं तैरङ्गीकृतमभविष्यत्तदा मुखवस्त्रिका-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्युपेक्षणपूर्वकं सामायिकमिति स्फुटाक्षरैस्ते कथमलिखिष्यन् ?, लिखितश्चैतत्तेन सामायिके तर्कसहकारिणा प्रत्यक्षप्रमाणेनैव समर्थिता विधिमुखनिषेधमुखाभ्यां तत् ईर्याप्रतिक्रमणपूर्वकता न इति गाथार्थः ।२३। ननु तावदास्तामन्ये पूर्वाचार्याः, ये त्वस्माकमुपकारकारकाः गुरवस्तैः पूर्वमेवेर्यासामायिकदण्डकादुपदिष्टा भविष्यति, ततः परम्परयाऽस्माभिरपीत्थमेवोपदिश्यते इति पराभिप्रायमपाकुर्वन्नाह–

देविंदायरिएहिं, अन्नेहिं वि तुम्ह पुव्वसूरिहिं । सामाइअपाढाओ, पच्छा इरिया सयं लिहिया ।२४।

व्याख्या–श्रीदेवेन्द्राचार्यैरन्यैरपि कुलमण्डनसूरिप्रमुखै'र्युष्माकं पूर्वसूरिभिः' युष्मत्पूर्वजगणेशैः 'स्वय'मात्मना 'सामायिकपाठात्' सामायिकदण्डकोच्चारात् 'पश्चा'त्तदनन्तर'मीर्या' ईर्यापथिकी 'लिखिता' लिपिसात्कृतेति गाथार्थः, भावार्थस्तु–श्रीदेवेन्द्राचार्यैरपि श्रावकदिनकृत्यप्रकरणे ''तओ विआलवेलाए, अत्थमंते दिवायरे। पुव्वुत्तेण विहाणेण, पुणो वंदे जिणुत्तमे ।२२८। तओ पोसहसालं तु, गंतूणं तु पमज्जए। ठावित्ता तत्थ सूरिं तु, तओ सामाइअं करे ।२२९। काऊण य सामाइयं, इरिअं पडिक्कमिय गमणमालोए । वंदित्तु सूरिमाई, सज्झायावस्सयं कुणइ ।२३०।'' एवं तिसृभिर्गाथाभिः सामायिकविधिं प्रतिपादयद्भिर्विद्वद्भिरविरुद्धमेवेर्यायाः सामायिकदण्डकात्पश्चादेव प्रतिक्रमणं यथासूत्रमसूत्रि, यथाश्रद्धानमेव शुद्धानां प्ररूपणात्, तथा चैतद्गाथात्रयस्य वृत्तौ ''साम्प्रतमष्टादशं सत्कारद्वारमाह–'तओ वि०' ततो वैकालिकानन्तरं–विकालवेलायामन्तर्मुहूर्त्तरूपायां, तामेव व्यनक्ति'अस्तमितेदिवाकरे' अर्द्धबिम्बादर्वागित्यर्थः, पूर्वोक्तेन विधानेन पूजां कृत्वेति शेषः, पुनर्वन्दते जिनोत्तमान्प्रसिद्धचैत्यवन्दनविधिनेति ।२२८। अथैकोनविंशतिवन्दनकोपलक्षितमावश्यकद्वारमाह–''तओ पो०' ततस्तृतीयपूजानन्तरं श्रावकः पौषधशालायां गत्वा यतनया प्रमार्ष्टि, ततो नमस्कारपूर्वकं, व्यवहित'तु'शब्दस्यैवार्थत्वात्, स्थापयित्वैव तत्र 'सूरिं' स्थापनाचार्यं ततो विधिना सामायिकं करोति ।२२९। अथ यत्र साधवोऽपि सन्ति श्रावकेण गृहे सामायिकं कृतं ततः सोऽसौ साधु-

For Private And Personal Use Only

समीपे गत्वा किं करोति ? इति आह 'काऊण०' साधुसाक्षिकं पुनः सामायिकं कृत्वा ईर्यां प्रतिक्रम्यागमनमालोचयेत्, तत आचार्यादीन् वन्दित्वा स्वाध्यायं काले चावश्यकं करोति ।२३०।'' इति व्याख्यानेन वृत्तिकृताऽपि सामायिकदण्डकपाठादन्वेवेर्यापथिकी समर्थिता, अन्यदप्यस्मदाशावल्लिपल्लवने तैः प्रयतितं (यत्) ईर्यां विनाऽपि तैः पौषधशालाप्रमार्जनमुपदिष्टं, तथा चेर्यामन्तरेणापि प्रमार्जनक्रियायाः शुद्धिरन्वेष्या, महानिशीथवाक्यस्यापि विशेषविषयत्वमायातं, प्रमार्जनस्याविशिष्टक्रियात्वात्, तथा स्थापनाचार्यस्य नमस्कारपूर्वकं स्थापनमिति निर्णीतं तैः, तथा च ये नमस्कारोच्चारमन्तरेणापि स्थापनामक्षादिरूपां स्थापयन्ति क्रियाऽवसरे तदपि निरस्तमेव द्रष्टव्यं, बहुवाच्यं चात्रोपेक्ष्य प्रकृतं प्रस्तूयते, तथा कुलमण्डनाचार्या अपि विचारामृतसङ्ग्रहग्रन्थे आवलि(स्तेनि)कमुद्दिश्य "नवमव्रतचूर्णौ हि सामायिकोच्चारः ईर्यापथिकीप्रतिक्रमणं गुरुचैत्यवन्दनं चोक्तानि सन्ति, एतावता षड्विधावश्यकविधेः समग्रस्याभिधानं, तत्स्यादेव" इति वाक्यलेशेन षष्ठविचारे प्रतिक्रमणाधिकारे गृहीतचूर्णिकाराभिप्रायाः सामायिकदण्डकोच्चारात्पश्चादेवेर्यापथप्रतिक्रमणं व्युत्पादितवन्तः[1], एवञ्च 'ठिइ(द्वार)-मन्विष्यतो द्वारप्रतिलम्भः' इति न्यायात्त्वत्पूर्वजैरिति वाक्यप्रतिपादनद्वारा आवश्यकचूर्णावपि ईर्यापथिकाशब्देन गमनव्यावृत्तिरूपोऽर्थो भवत्परिकल्पितो मूलतः समुन्मूलित एव, इतरथा भवानिव सोऽपि तथैव प्रत्यपादयिष्यत्, ईर्यापथिक्या एव प्रतिक्रमणावश्यकान्तर्गतत्वं, न गमननिवृत्तेरिति बीजमन्वेष्यं, इति भवत्पूर्वजगुरूणामपि ईर्याप्रतिक्रमणं सामायिकदण्डकपाठात्पश्चादेवानुमतं, नैव प्रागिति सम्भावयामः, अपरं भवत्पूर्वजेन गुरुणा सर्वत्रेर्यापथिकीप्रतिक्रमणपुरस्सरत्वश्रद्धानाग्रहगुरुणाऽपि रत्नशेखरसूरिगुरुणा श्रावकप्रतिक्रमणवृत्तावर्थ-

१ एवमेव स्वमताभिनिवेशं परित्यज्य जिनाज्ञाऽविरुद्धप्ररूपणाप्ररूपकैरुपाध्यायश्रीमन्मानविजयैः स्वविरचिते न्यायाचार्यश्रीमद्यशोविजयोपाध्यायैश्च संशोधिते धर्मसङ्ग्रहे आवश्यकचूर्णिबृहद्वृत्तिकारादिप्राचीनबहुश्रुताभिप्रायानुकूल एष एव विधिः सामायिकस्य प्रतिपादितः । एवमेव श्रीमन्मानदेवसूरिभिर्हारिभद्रीयश्रावकधर्मविधिप्रकरणवृत्तौ च ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीपिकानम्न्यामादौ यथा तथा महानिशीथपदप्ररूपणेन साधितेर्यापथिकीप्राथम्येनापि सामायिकाधिकारे (१४८ पत्रे) ''साध्वाश्रयं गत्वा गुरून्नत्वा गुरुसमक्षं यथाविधिसामायिकदण्डकोच्चारादि कृत्वा यथाऽयेष्ठमाचार्यादीन्वन्दते, पुनरपि गुरुं वन्दित्वा प्रत्युपेक्ष्य निविष्टः शृणोति पठति पृच्छति वा'' इति वाक्यात्सामायिकदण्डकात्पश्चादीर्यापथिकीं स्वमतानुरागात्साक्षादनुक्त्वाऽपि सामायिकात्पुराऽपि उत्सूत्रवादित्व-त्रययेवेर्यापथिकी न श्रुतिपथातिथिः कृतेत्यपि विमृश्यं ।२४। अथ पुनरपि पूर्वपक्षिणं शिक्षयन्नाह–

सुद्धितिअजाणगाणं, सामाइअविहिगिहं कुणंताणं । पायप्पाया इरिया, विस्सरिआ !! कहं गुरुणं पि ।२५।

व्याख्या–हे नोदक ! त्वं कथयेति योज्यं, 'गुरूणामपि' भवदाचार्येणामपि 'कथं' इति विस्मयोद्बोधकवाक्यं, ईर्या विस्मृता !!, किं भूतानां गुरूणां ? 'शुद्धित्रयज्ञातॄणां' शुद्धित्रयं मनोवाक्कायरूपं, शुद्धित्रितयं जानन्तीति शुद्धित्रयज्ञातारस्तेषां, पुनः किं भूतानां ? 'सामायिकविधिगृहं कुर्वतां' सामायिकस्य यो विधिः–करणानुक्रमप्ररूपणं, स एव गृहं सामायिकविधिगृहं, तत्कुर्वतां–रचयतां, किम्भूता ईर्या ?, 'पादप्राया' भवदभिप्रायेण सामायिकप्रासादे पादरचनातुल्येति गाथार्थः, भावार्थस्त्वयं–यदीयमीर्यापथिकी सामायिकविधिगृह-निर्मापणे पादसदृशत्वेन भवद्गुरूणामभिमता भवेत्तदा श्रावकदिनकृत्यप्रकरणे श्रावकप्रतिक्रमणविवरणे च विस्मृता न भवेत्, न हि सुशिक्षितस्तक्षको वेश्मविधानव्यतिकरे पादं विस्मारयति, ते तु जातुचिदपि न विस्मरणशीलाः, तस्मात्सामायिकोच्चारगृहरचनायां न पादप्राया, स्वाध्यायादिकृत्यगृहे तु सा पादप्राया, अतो न तैस्तत्पूर्वं विस्मारितेति, अपरञ्च तेऽपि शुद्धित्रयज्ञातारः, ते यदि ईर्यापथिकीं विनाऽत्र मनःशुद्धिर्न भवेदेवेति निर्धारितवन्तस्तर्हि सामायिकदण्डकात्प्राक् तां कथं विस्मारयाञ्चक्रुः ?[1], न हि निराकुलो रजको वासः

१ केयं शुद्धिः ?, न हि म्लेच्छोऽपि शौचं कृत्वा मलोत्सर्जनं कुरुते, कथं नु पुनरिहामुत्र च शर्मकरं सर्वोत्तमं सामायिकं कुर्वन् श्राद्धः पूर्वं शौचप्रायमीर्यापथिकीप्रति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रक्षालनाय वानेयसरसि गच्छन् क्षारद्रव्यविशेषं विस्मृतिविषयीकरोति, एतदपि चक्षुषी निमिल्य परिभावनीयं, यदि च प्राचां भवद्गुरूणामीर्यापूर्वकमेव सामायिकं ग्राह्यमित्याग्रहोऽभविष्यत्तदा विचारामृतसङ्ग्रहादिग्रन्थेषु विचारान्तराणीवेर्याविचारोऽपि तैर्लिपिसात्कृतोऽभविष्यत्, तदानीमप्यस्मद्गुरूणां स्कन्धास्फालनपूर्वकं सामायिकदण्डकात्पश्चादेवेर्याप्ररूपकाणां जागरूकत्वादिति गाथार्थः । २५ । ननु देवेन्द्राचार्याणामभिप्रायोऽपि देवेन्द्राचार्यशिष्यधर्मकीर्त्तिकृतसङ्घाचारभाष्यवृत्तिवाक्यात्तथैवानुमास्यते, शिष्याभिप्रायस्य गुर्वभिप्रायानुगतत्वादिति पूर्वपक्षिणो विकल्पजालमुन्मूलयन्नाह—

**णय पच्चक्खपमाणो—वलद्धमत्थं निसेहए नूणं । अणुमाणं ण य सीसा—ऽभिप्पाओ बोहगो वि तस्स ।२६।**

व्याख्या—'नच'निषेधे 'अनुमान'मित्यनुमानप्रमाणं 'प्रत्यक्षप्रमाणोपलब्धं' यत् प्रत्यक्षप्रमाणेनोपलब्धं तादृशं'अर्थं'वस्तुं निषेधयति 'नून'मिति निश्चयेन, न निषेधयत्येव, 'च'पुनः'शिष्याभिप्रायो'धर्मकीर्त्त्यभिसन्धिः 'तस्य'गुरोर्देवेन्द्रसूरेरभिप्रायस्य बोधकोऽपि न भवतीति गाथाऽक्षरार्थः, अत्रेदमैदम्पर्यं—''काऊण य सामाइअं, इरिअं पडिक्कमिय गमणमालोए'' इति वाक्येन देवेन्द्राचार्यैः साक्षादत्रेर्या पश्चादेवोप-

क्रमणं कृत्वा पश्चान्मलोत्सर्जनप्रायं सावद्ययोगपरिवर्जनं कुर्वीत ?, ततो मलवत्प्रथमं सावद्ययोगं परित्यज्य पश्चाच्छौचवदीर्यापथिकी शुद्धिर्युक्ता । अथवा ''तुष्यतु दुर्जन'' इति न्यायमनुसृत्यानिष्टमपि सामायिकोच्चारात्प्रागीर्या प्रतिक्रमणं वाद्युक्त्या यदि क्षणं मन्यते तदा गणधरैः सामायिकसूत्रपाठेऽपि ''तस्स भंते! पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि'' इति पूर्वमुक्त्वा पश्चात् ''करेमि भंते! सामाइयं सावज्जं जोगं पच्चक्खामि जाव नियमं पज्जुवासामि दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि'' इत्थं कथं न भणितं ?, यतो वाद्यभिप्रायेणातीतकालीनसावद्ययोगात्प्रतिक्रम्य पश्चादेव वार्त्तमानिकसावद्ययोगपरिवर्जनं यावन्नियमं कर्त्तव्यं, तत्तु अनेनैवोपर्युक्तप्रकारेण सार्थकं भवेन्नान्यथा, तथा आवश्यकसूत्रचूर्णिवृत्त्यादौ च ''सामाइअं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च'' इत्यत्रापि वाद्यभिप्रायेण ''सामाइअं नाम निरवज्जजोगपडिसेवणं सावज्जजोगपरिवज्जणं च'' इत्थं भणितव्यमासीत्, ईर्याप्रतिक्रमणस्य निरवद्ययोगप्रतिसेवनात्मकत्वात्सामायिकोच्चारस्य सावद्ययोगपरिवर्जनात्मकत्वाच्च, इत्येतत्सर्वमनाकुलचित्तेन सुष्ठु परिभावनीयम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिष्टा, ततस्तच्छिष्यवाक्यं तु "श्रुत्वैवमल्पमपि पुष्कलिनाऽनुचीर्ण–मीर्याप्रतिक्रमणतः किल धर्मकृत्यं। सामायिकादिविदधीत त(तः)था प्रभूतं, तत्पूर्वमत्र च पदावनिमार्जनं त्रिः।१।" इत्येवंरूपं, ततो गुरुवाक्ये प्रत्यक्षोपलब्धमीर्यापथिकीपश्चात्त्वमपाकृत्य प्रवृत्तेन शिष्याभिप्रायेण गुरूणामाशयस्तथैव कथमनुमीयते ?, प्रत्यक्षबोधितेऽर्थेऽनुमानेन निषेधानवकाशात्, साक्षादुपलब्धे धूमध्वजस्योष्णत्वे तत्रैव पुनर्दाहकत्वेन हेतुना हिमानीव शीतलत्वानुमानवत् , एतस्यापि कालात्ययापदिष्टदोषदुष्टत्वमेव, श्रावकदिनकृत्यवाक्योक्तार्थाद्धर्मकीर्तिवाक्ये विपरितत्वमेव बोध्यत इति भावः, तथापि न शिष्याभिप्रायो गुर्वभिप्रायमवगमयति, इतरथा कल्पकिरणावल्यां "यत्तु कश्चिद्बहुवचनं बहुकल्याणकापेक्षं तदुपेक्षणीयं" इत्यादिवदतो वृत्तिकार(वावदूक)स्याभिप्रायेण स्वशिक्षिता अपि शिष्याः साधु कुलमण्डनाचार्याभिप्रायमनुमास्यन्ते, तैस्तु श्रीविनयेन्दुसूरिकृतचिरन्तनकल्पनिरुक्तमुपजीव्य स्वकृतकल्पव्याख्यायां बहुवचनं बहुकल्याणकापेक्षतयैव व्याख्यातं, शिष्याभिप्रायेण तु तदुपेक्षणीयमिति युक्तमस्मदुक्तं, नैतावताऽपि कृतं, गुरूणां प्रवचनानुपयोगित्वमिति कल्पकिरणावलीकारवक्तव्यमधिकं[1] गुरोर्गौरवमापादयति, तथा च शिष्याभिप्रायेण गुर्वभिप्रायानुमानमपि कल्पकिरणावलीकारेण निराकारीति दृश्यं।२६। अथ ईर्यापथिकायाः नूतनार्थकरणेन न केवलं देवेन्द्राचार्याणामेव वाक्यस्य वैपरीत्यं कृतं किन्तु धर्मकीर्त्तेरपि गाढमपकृतमित्याह–

**कहमवि धम्मेण सयं, कहिआ इरिआ गया अणत्थेण। कत्तियपिंजियरूयं, जायं कम्मेण कप्पासं।२७।**

व्याख्या–कथमपि महता कष्टेन 'धर्मेण' इति पदैकदेशे पदसमुदायोपचाराद्धर्मकीर्त्तिना–सङ्घाचारकारेण 'कथिता' प्रतिपादिता 'स्वय'मित्यात्मना, न तु गुरुसम्प्रदायेन 'ईर्ये'ति ईर्यापथिका सामायिकोच्चारात्प्रागिति शेषः 'अनर्थेन' गमनव्यावृत्तिरूपेण कुत्सितार्थेन भवदु-

१ "अकल्याणकभूतस्ये"ति किरणावल्युत्सूत्रवाक्यमपेक्ष्य "बहुकल्याणकार्थे बहुवचनमिति प्रणेतारो बालिशा एवे"ति कल्पसुबोधिकाद्वितीयावृत्तौ १० पत्रे टिप्पनकारप्रखर्यानन्दीयवचनमपि।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्तार्थाभासेन 'गता'नाशमाप, तथा च कर्त्तितपिञ्जितरूतं 'कर्मणा'ऽभाग्येन कर्पासं जातमासीत्, अर्थश्लेषश्चायं–कथमपि बहुतराशुभकर्मक्षयोपशमेन 'धर्मेण' दानाद्यर्जितपुन्येन पुराकृतेन 'ईर्या' गमनागमनादिदोषव्यावृत्तिहेतुरावश्यकपाठविशेषा 'स्वय'मात्मना 'कथिता' पाठगोचरीकृता 'अनर्थेन' सावद्यकरणीयेन 'गता'याता–प्रतिक्रान्ताऽप्यप्रतिक्रान्ताऽऽसीत्, उपाख्यानार्थस्तु स एवेति गाथार्थः श्लेषार्थश्च, भावार्थस्तु–धर्मकीर्त्तिना कथञ्चित्सामायिकाधिकारे सङ्घाचारे पुष्कलिदृष्टान्तेन सर्वाऽन्यकृत्येष्विव सामायिकेऽपि ईर्या प्राक्साधिता साऽपि भवता गर्भश्रावेणेव गमिता, तद्यथा "तएणं से पुक्खली समणोवासगे जेणेव पोसहसाला जेणेव संखे समणोवासए तेणेव उवागच्छइ उवागच्छित्ता गमणागमणाए पडिक्कमइ, ग० पडिक्कमित्ता संखं समणोवासगं वंदइ नमंसइ" इति श्रीव्याख्याप्रज्ञप्तिसत्कद्वादशशतकप्रथमोद्देशकनिबद्धपदैकदेशव्याख्यायां (५५५ पत्रे) "गमणागमणाए पडिक्कमइत्ति–ईर्यापथिकीं प्रतिक्रामतीत्यर्थः" एवंविधं श्रीपरमगुरुश्रीमदभयदेवाचार्याणां वाक्यं प्रतिभूप्रायं परिकल्प्य "श्रुत्वैवमल्पमपि पुष्कलिनाऽनुचीर्ण"मित्यादि पाठेन पुष्कलिदृष्टान्तेन तेन सामायिकपाठात्प्राक् यथाकथञ्चिदीर्यापथिकी साधिता तथापि ईर्यायाः भवदीयार्थकल्पनया श्रीप्रज्ञप्तिवृत्तावपि ईर्यापथिक्याः गमनव्यावृत्तिरूपार्थसमर्थनेन दृष्टान्तासङ्गत्या काकनाशं नाशिता, तथा च सति कथञ्चिदुपार्जितार्थोऽपि तदर्थमोषेण भवता धर्मकीर्त्तिरपि निःस्वीकृतः, अपरश्च वस्तुगत्याऽनर्थकस्याप्यर्थान्तरस्य करणेन भवता धर्मकीर्त्तिरस्माकमभिमतार्थसाधक एव कृतः, युष्माकं त्वभिमतोऽपि त्वयाऽनभिमतकारी कृतः, [1]तदेवमियं कल्पना परविघ्नकरणाय प्रवर्त्तिताऽपि वस्तुवृत्त्या स्वोक्तार्थविघ्नकारिण्येवासीत्, यतस्तेनापि "ईर्याप्रतिक्रमणतः" इति पदं

१ "तदेव स्वनासा निकर्त्तनेन परविघ्नकरणमिवेयं कल्पना परविघ्नकरणाय प्रवर्त्तिताऽपि स्वनासानिकर्त्तनमिव वस्तुवृत्त्या स्वात्मकार्यविघ्नकारिण्येव, अस्माकं तु शत्रुनासानिकर्त्तनमिव परपक्षम्लानिरेव मङ्गलं" इति प्रत्यन्तरे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यपादि, तस्यापि पदस्य गमनव्यावृत्तिरूपार्थकथनेनाप्यर्थसङ्गत्या सिद्धं नः समीहितं, स्वस्थे चित्ते सर्वं भवतीति सामायिकेऽपि गमनव्यावृत्तिपूर्वकत्वमभिमतं, तथा च वः समीहितं तृषितस्य मृगतृष्णाजलपानायोपक्रमे इवात्रापि न निष्पत्तिमायातं, तदेवं धर्मकीर्त्तिवाक्ये ईर्यायाः काल्पनिकोऽर्थश्चेत्कल्प्यते तदा शिष्यवाक्येन गुर्वभिप्रायानुमानमिति युक्तिः प्रत्युक्ता स्यात्, यदि मुख्योऽर्थः स्वीक्रियते तदा "एकत्र दृष्टो न्यायः सर्वत्रोपयोगी भवती"ति दिनकृत्याद्यन्यसूत्रवृत्त्यादावपि स एवार्थोऽङ्गीकार्यो, नार्थान्तरमीर्याया अङ्गीकार्यं, सोऽयमुभयतः पाशारज्जुरिति, तथा च मुञ्च कदाग्रहं, स्वीकुरु सर्वगच्छसम्मतं सङ्गतमीर्यापथिकायाः स्वरूपार्थमिति ।२७। अथ श्रीदशवैकालिकवृत्तिगतं श्रीमद्धरिभद्राचार्यवाक्यं समर्थयन्नाह–

हरिभद्दायरियाणं, वयणं दसयालिअस्स वित्तीए । एमेव य सामन्नं, णेयं सुद्धिवि सुप्पसिद्धा ।२८।

व्याख्या–'दसयालिअस्स'त्ति कालेन निर्वृत्तं कालिकं, प्रमाणकालेनेति भावः, दिनस्यान्त्यचतुर्घटिके दशाध्ययनभेदात्मकत्वाद्दशप्रकारं कालिकं, प्रकारशब्दस्य लोपाद्दशकालिकं, तस्य दशकालिकस्य, 'एकदेशविकृतमनन्यवदिति' न्यायाद्दशवैकालिकस्य वृत्तौ 'हरिभद्राचार्याणां' याकिनीमहत्तराधर्मपुत्राणां जिनभट्टपादोपजीविनां 'वचनं' "इर्यापथिकीप्रतिक्रमणमकृत्वा नान्यत्किमपि कुर्यात्तदशुद्धतापत्ते"रित्येवंरूपमपि'एमेव'त्ति एवमेव महानिशीथवाक्यवत्सामान्यं, च एवार्थः, 'सामान्यमेव' साधारणमेव, न विशेषरूपं–प्रतिव्यक्तिवृत्तिः 'ज्ञेयं' ज्ञातव्यं, अत्रापि युक्तयस्ता एव योज्याः, 'शुद्धिरपि' मनोवाक्कायरूपा सामायिकदण्डकोच्चारात्पूर्वमपीति योगः, 'सुप्रसिद्धा' विदितेति गाथार्थः, सूचितार्थस्तु अयं–ननु सुहृद्भावेन पृच्छामोऽत्र यदि श्रीहरिभद्राचार्यैरावश्यकविवरणे ईर्यां विनाऽपि सामायिकदण्डकोच्चारः स्यादित्यादृतं भवेत्तदा दशवैकालिकवृत्तावेतत्प्रतिपादितं भवेत्, यदुत 'सामायिकाधिकारे "सामायिकं कुर्वतः प्रतिक्रान्तेर्यस्य चित्ताशुद्धिर्भवति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उताशुद्धचेतस एव सामायिकं शुद्धयति अथवा शुद्धचेतसः सामायिकमेव न शुद्धयति (अथ च) यद्वा सामायिककर्तुश्चित्तस्याशुद्धिरेव न सम्भवति (तत्र) तत्सामायिककृत्योद्यतस्येर्याप्रतिचिक्रमिषोर्जिह्वैव वा जडायते रोगाद्युत्पत्तिर्वा धनादिनाशो वा जनोपहसतिर्वा परलोकानाराधनं वा अग्रतः क्रियास्थगितिर्वा इत्याद्यन्यतमेन हेतुना (ध०सा० ई० ष० पत्र २६)" अस्माभिरावश्यकविवरणे ईर्यासामायिके प्राग् न्यषेधि' नोक्तश्च तैस्तस्मात्परस्परं विरोधो दुर्निरोधः, एककर्तुर्वाक्यद्वयस्य विरुद्धता निरुद्धस्यासम्भवाद्विमृश्यमेतदिति चेन्न, दशवैकालिकवृत्तौ तथा सद्भावेऽपि सद्भावाचारकारेण "ईर्याप्रतिक्रमणतः किल धर्मकृत्यं" इति वदता तत्रैवैवं स्फुटं वाच्यं भवेत्, यदुत 'अस्माभि-"र्वृद्धाः पुनरेवमाहु-उत्कृष्टा चैत्यवन्दना ईर्यापथिकीप्रतिक्रमणपुरस्सरैव कार्या, अन्यथाऽपि जघन्या मध्यमा" इति यद्वाक्यमुक्तं तल्लघुमध्यमचैत्यवन्दनयोः क्रियमाणयोरीर्या न शुद्धयति ईर्यायां वा प्रतिक्रान्तायां ते चैत्यवन्दने न शुद्धयतः अशुद्धचेतसैव वा ते विधेये[1] उत लघुमध्यमचैत्यवन्दनकर्त्रोश्चित्तस्याशुद्धिर्न भवेत् अथवा तत्रेर्याप्रतिचिक्रमिषोरेडमूकत्वं स्यात् विवशता वा स्यात् एवं वातप्रकोपदेव्याकोपविषधरस्फटाटोपजिनाज्ञालोपदुर्दोषारोपादिहेतुनेति' अत्राप्युत्तरमन्वेष्यमिति वदतामस्माकमपि वक्त्रं न वक्रीभवेत्, भवदुत्तरेणैव वयमपि दत्तोत्तराः, यतश्चोभयोस्समो दोषः परिहारोऽपि स(त)त्समः, "नैकः पर्यनुयोक्तव्य-स्तादृगर्थविचारणे" इति न्यायमुद्राऽपि मनसि धारणीया, तथा च युष्माभिरत्रोत्तरे दत्तेऽदत्ते वाऽस्माकमिष्टापत्तिः सुजातैव, ननु भवतु तावत्सामायिकोच्चारे ईर्यायाः पश्चात्त्वं समयोक्त्या युक्त्या च, परं प्रत्याख्येयद्विविधत्रिविधप्रत्याख्यानस्य शुद्धयै करणशुद्धिर्विधेया, करणत्रयस्येर्यां विना कथं शुद्धिर्भवित्रीति चेन्न, पोतिकया कायप्रतिलेखनेन तनुशुद्धिः, "निसीहियाए" इति पदेनान्यसावद्यकृत्यनिषेधान्मनःशुद्धिः, पोतिकाप्रतिलेखनायां शुद्धित्रयस्यापि सत्त्वाद्वचनशुद्धित्वमपि तदवस्थमेव,

१ "शुद्धचेतसा वा ते न विधेये तयोः क्रियमाणयोश्चेतोऽशुद्धतैव न स्यात् प्रतिक्रान्तायामपि तस्यां तत्र चेतःशुद्धिर्न भवेत्, अथवा" इति प्रत्यन्तरे।



For Private And Personal Use Only

तत्प्रतिलेखनानन्तरमपि सामायिकोपयोगी वाक्यादृते नान्यत्किमपि वक्तव्यं, एवमपि तस्य वाक्शुद्धिरायाता, एवञ्चातिनिर्बन्धकरणे शुद्धित्रयमपि गृहाण, किञ्च सामायिकार्थमायातोऽपि प्रतिक्रान्तायामपि ईर्यायां कार्यान्तरव्यासक्तोऽकृतसामायिकोऽपि वस्त्रप्रतिलेखनादिव्यपदेशान्तरेण सामायिकमतिजानीते (गृहादौ) याति च, सामायिकार्थं प्रतिलेखितायां पोतिकायां गच्छन्नपि शङ्कते[1], इत्यपिनोद्यं चित्तचमत्कृतिकारि, तदेवं सर्वपूर्वाचार्यैर्महानिशीथवाक्यं विशेषविषयं समर्थितं भवद्गुरुभिर्देवेन्द्राचार्यधर्मकीर्त्युपाध्यायाद्यैरपि, न केवलं तैरेव, किन्तु ईर्यापथिकायाः नूतनार्थकारिणा भवताऽपि स्वकृतेर्यापथिकीषट्त्रिंशिकायां द्वितीयगाथाव्याख्याने "बृहच्चैत्यवन्दनगुरुवन्दनदेशसर्वचारित्रोपधानप्रतिक्रान्तिसामायिकपौषधादिक्रियाकलापमात्रे श्रीमहानिशीथवचनात् उपलक्षणात् श्रीहारिभद्रीयदशवैकालिकवृत्तिवचनाच्च चित्तशुद्धिहेतुत्वेन प्रथममेवेर्याप्रतिक्रान्तिः 'मुणिअ'त्ति ज्ञाता" इति वाक्यान्महानिशीथवाक्यदशवैकालिकवृत्तिवाक्ययोर्विशेषविषयत्वं स्फुटमेवोरुरीकृतं, मुखेन च द्वयोर्वाक्ययोः सर्वक्रियायां प्रत्येकं प्रत्येकं गोचरत्वं वदन्नपि बृहच्चैत्यवन्दनबृहद्गुरुवन्दनविषयत्वं तयोर्वदन् भवान् स्वोक्तमपि न स्मरति, पूर्वापरबाधमपि नाकलयति, विद्वज्जनोपहसति, लज्जामपि त्यजति, तदेवं सर्वसुविहितगीतार्थयतिजनसम्मततया महानिशीथवाक्यं विशेषकृत्यविषयमेव, न प्रतिव्यक्तिसर्वकृत्यविषयमित्यायातं, तथा चेर्याया अर्थान्तरमपि तिरोहितं द्रष्टव्यमिति ।२८। ननु सामायिकदण्डकस्य गणधरकृतत्वेन सिद्धान्तत्वादप्रतिक्रमितायामीर्यापथिक्यां (तस्य) पाठोऽपि न कल्पते किं पुन-

---

१ धर्मसागरेण स्वेर्यापथिकीषट्त्रिंशिकायां १७ पत्रे "मया नेर्याप्रतिक्रान्तेति धिया समुच्चरितसामायिकोऽपि सचित्तं स्पृशन्न शङ्कते" इति यदुक्तं तद्विमृश्यं तत्त्वविवेकविवेचकैः, यतो मया न समुच्चरितं सामायिकदण्डकमिति धिया प्रतिक्रान्तेर्योऽपि सचित्तजलं पिबन्नपि न शङ्कते तर्हि सचित्तस्पर्शने तु का कथा ? इत्यपि न विमृष्टं तेन मूढेन, वस्तुतस्तु समुच्चरितसामायिको जलादिसचित्तस्पर्शनेऽपि शङ्कते, अनुच्चरितसामायिकाः प्रतिक्रान्तेर्यास्त्वनेके सचित्तजलं स्पृशन्तः पिबन्तश्च दृष्टास्तथा गृहे गत्वा गृहारम्भादिकार्याणि कुर्वन्तो दृष्टिपथेऽवतरन्ति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रनुष्ठानमिति चेन्न, ईर्यापथिक्या व्यभिचारात्, सूत्रत्वेऽपि तां विनाऽपि तस्याः पठ्यमानत्वात्प्रतिक्रम्यमानत्वाच्च, नन्वीर्यापथिकी तां विनाऽपि पठ्यते प्रतिक्रम्यते च, परं सामायिकमप्रतिक्रान्तायामीर्यायां न पठ्यते तत्कथमनुष्ठीयते ? इति चेन्न, अन्योन्याश्रयदोषादप्रतिक्रान्तायामस्यामसौ पठ्यते प्रतिक्रम्यते च, सामायिकं तु प्रतिक्रान्तायामेव तस्यां पठ्यते, सूत्रपठनविध्यतिक्रमे पुष्टालम्बनस्याभावात्, अनुष्ठीयते त्वप्रतिक्रान्तायां, आगमोक्तत्वाद् वृद्धव्यवहारे तथैव प्रवृत्तत्वाच्च, किञ्च यथा कालवेलायामपाठ्यमपि षड्विधावश्यकं कालवेलायामनुष्ठीयते आप्तोपदेशात्, तथा ईर्यापथिकायामप्रतिक्रान्तायामपाठ्यमपि सामायिकं अनुष्ठीयते, आप्तोपदेशप्रतिपालनस्य बहुफलत्वादिति कण्टकोद्धारः, अथ यतिजनोचितशिक्षया विशिष्य पूर्वपक्षिणं शिक्षयति—

**असमत्थमुहे गाली, सुसमत्थमुहे कहं भवे ? गाली । सो सत्थेहि विआरिय, तस्सऽत्थविहेडणं कुणई ।२९।**

व्याख्या—'गालि'र्विरुद्धासभ्यशंसनं अशमस्थानां—शम उपशमो, न शमो अशमः शमादन्यो वाऽशमस्तत्र तिष्ठन्तीत्यशमस्था—उपशमरहिताः क्रोधात् ध्माता इति यावत्, तेषामशमस्थानां मुखमशमस्थमुखं, तस्मिन्नशमस्थमुखे भवेत्, सुशमस्थानां—परमोपशमापन्नगात्राणां मुखं सुशमस्थमुखं तस्मिन् सुशमस्थमुखे'कथं'केनप्रकारेण गालिर्भवेत् ?, असम्भाव्यमेतत्तेषां, "यदि सत्यं कः कोपः स्या-दऽनृतं किन्नु कोपेन ?" इति वाक्यस्य तच्चेतसि प्रतिभासनात्, 'स'इति सुशमस्थसाधुः 'तस्य'पूर्वपक्षिणः 'शास्त्रैः' सिद्धान्तैर्विचार्य'अर्थस्य'तदुक्तार्थस्य 'विहेटना'विविधाऽर्थविहेटना, तां अर्थविहेटनां करोति. आगमोक्तयुक्त्या तदुक्तमर्थं विघटयतीति भावार्थः, श्लेषार्थस्तु अयं—'असमर्थमुखे' निःसत्त्वमुखे'गालि'रऽसज्जल्पनं स्यात्, निःसत्त्वतोऽकिञ्चित्करत्वात्, परं सुसमर्थमुखे कथं गालिर्भवेत् ?, अपि तु नैव स्यात्, किन्तु सुसमर्थः क्षत्रियादिः शस्त्रैर्विदार्य 'तस्य' विपक्षस्य 'अर्थानां' सुवर्णादिवस्तूनां'विहेटनं'विघटनं अर्थविहेटनं, तत्करोतीत्यन्योक्तिः, भावार्थस्तु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्भवता धनिकेनावियुक्तपरक्षेत्रमध्यगतखाद्यफलास्वादाघ्रातेन स्ववसतिभूविवरान्तरालकोणस्थितेन शृगालबालेनेव तुच्छनिन्हवौष्ट्रिक-कुपाक्षिकत्वादि[1] विरुद्धशब्दशंसनमकारि तत्स्वात्मन्येव विरुद्धतां व्यनक्ति, तद्यथा—पूर्वं सामायिकोच्चारं पश्चादीर्यापथिकाप्रतिज्ञावतां यत्तुच्छत्वं त्वया उक्तं, तन्न द्रव्यतोऽपि तुच्छत्वं पूर्वोक्तयुक्त्या सर्वसुविहितानामीर्यापथिकायाः सामायिकपाठात्पश्चात्प्रतिक्रान्तौ नियत-मेकवाक्यत्वात्, नापि तुच्छत्वं भावापेक्षया, स्वच्छन्दकल्पनाया एव तन्मूलत्वात्, सा स्वच्छन्दता चेर्यायाः सकलगच्छसम्मतार्थाद्विरुद्धार्थ-प्ररूपकत्वेन भवत्येव पर्यवसिता, "आत्मीयो बाणः आत्मानमेव प्रहरती"ति रीतेर्युक्तत्वमुत्पश्यामः, तथैर्यापथिकापदस्य स्वपक्षपरपक्ष सम्मतार्थानङ्गीकारेण निन्हवत्वं कुपाक्षिकत्वं च स्वस्मिन्नेव पर्यवस्यतः, आगमोक्तार्थापलापस्यैव तद्बीजत्वात्, तथा च भवत्प्रयुक्तानेकास्मदीय विरुद्धशंसनाधारो गुरुतत्त्वप्रदीपकारोऽपि तत्त्ववृत्त्या गुरुत(त्त्वाप्रदीपक एव)त्त्वप्रदीपनक एव, यतस्तद्ग्रथितग्रन्थे एव तथात्वं प्ररूपितं, तत्सम्मत्या स्वमत्या भवता प्रशंसितं, अहो !! "अन्धोऽन्धमनुकर्षति" इति न्यायः, यथा वा कूटकार्षापणपण्यो वाणिजकः कूटकार्षापण-व्यवहारिणामिव परीक्षाकारिणां कक्षीकृत्य तद्व्यवहर्त्तुमुपक्रमते परीक्षकपुरन्दराणां पुरतः, तथा त्वमपीति, तेन स्वकृतगुरुतत्त्वप्रदीपग्रन्थे "स्वावधिं तच्च क्षेत्रेऽत्रा—ग्रतोऽप्येभ्यो भविष्यति। स्तोकेष्वप्येषु चारित्रं, वज्रदुष्पसहादिवत्॥१९॥ व्याख्या—तच्चारित्रं 'स्वावधिं'निजावधिं

---

१ एतत् निन्हवशिरोमणिधर्मसागरकृतेर्यापथिकीषट्त्रिंशिकायां १८ पत्रे "पश्चादीर्याप्रतिक्रान्तिप्रतिज्ञावतां कुपाक्षिकाणां मते" तथा ३० पत्रे "पश्चादीर्याऽभ्युपगन्तारो द्रव्यतोऽपि तुच्छाः, भावतोऽपि ज्ञानविकलाः" इत्यादिना पश्चादीर्याप्रतिक्रान्तिप्रतिज्ञायाः मूलभूताः श्रीजिनदासमहत्तराचार्यश्रीहरिभद्रसूरिश्रीअभयदेवसूरिश्रीयशोदेवसूरिश्रीदेवगुप्तसूरि-श्रीयशोदेवोपाध्यायश्रीहेमचन्द्रसूरिश्रीदेवेन्द्रसूरिश्रीकुलमण्डनसूरिश्रीमानविजयोपाध्यायश्रीयशोविजयोपाध्याय-प्रभृतयोऽपि कुपाक्षिकाः ज्ञानविकलाश्चेति ख्यापयन् योऽदीर्घदृष्टिमूढो न लज्जितः सोऽस्मादृशानेवं लिखेत्तत्र किमाश्चर्यं ?, यतस्तैरेवोपर्युक्ताचार्यैः "पच्छा इरियावहियाए पडिक्कमइ" इत्यादिना सामायिकदण्डकोच्चारात्पश्चादीर्या प्रतिपादिता, तानेवाक्षरा-न्दर्शयतामस्माकं यज्जल्पनं तद्वस्तुतस्तेषामेव जल्पनं, अथवाऽसमर्थमुखे गालिरऽसज्जल्पनमेव भवति तत्र किमाश्चर्यम् ?।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यावत् 'अत्र क्षेत्रे' गौर्जरावनिप्रभृतिके अग्रतोऽपि 'एभ्य'स्तपोवद्भ्यो भविष्यति, य एव एभिस्तपोवद्भिर्दीक्षितास्त एव चारित्रिण इत्यर्थः इति बलादापन्नं, 'एषु'तपोवत्सु स्तोकेष्वपि चारित्रमस्ति, न चात्रेदमाशङ्कनीयं-अपरं सर्वमप्यचारित्रं एकस्मिन्नेवात्र गच्छे चारित्रमिति कथं घटते ?, 'वज्रे'त्यादि, यथा प्रभुश्रीवज्रस्वामिशिष्ये वज्रसेने एकस्मिन्नपि चारित्रमभूत्तथा यथा दुष्प्रसहाचार्येऽल्पपरिवारेऽपि चारित्रं भविष्यति तथा एष्वपि स्तोकेषु चारित्रं सिद्धमिति। गत्यागतिमिते क्षेत्रे–ऽत्रान्यगच्छे हि नाप्यते। एभ्यो विशिष्टतैष्वेवा–शठत्वाप्तिर्बलात्ततः ।१६। व्याख्या–'अत्र'अस्मिन् क्षेत्रे 'गत्यागतिमिते' मालवकदेवगिरितिलङ्गप्रभृतिके'हि'यस्मात्कारणा'दन्यगच्छे' तपोवद्गच्छव्यतिरिक्ते 'एभ्य'-स्तपोवद्भ्यो'विशिष्टता'दुष्करकारिता'नाप्यते' न दृश्यते नैव वा श्रूयते, तत 'एष्वेव' तपोवत्स्वेव बलादशठत्वप्राप्तिरिति।'' इति प्ररूपणा-त्तपोगणादन्यत्र चारित्राभावस्तेनाङ्गीकृतः, तथा तद्गणस्थयतिदीक्षितेष्वेव चारित्रं, यत्र तेषां विहारस्तत्र क्षेत्रे एव च चारित्रं, तपोगणा-दन्यगच्छानुरागी गच्छस्था वा सर्वेऽपि शठा, अशठत्वं तपोगणयतीनामेवेति च तेनाङ्गी कृतं, तथा च यो गाढं स्वगच्छानुरागी गच्छान्त-रीयाणां च प्रतिपक्षभूतस्तस्य किं किं न सम्भाव्यं, यः सर्वगच्छावज्ञायां बद्धकक्षः सोऽस्मद्गच्छस्य स्वच्छस्य सुतरां दूषक एव, 'गृहमत्तुं प्रवृत्तस्य, कपाटः पर्यटायते' इति ज्ञेयं, यदि तद्वदन्यगच्छीयैर्विनाशतपदीकारं स्वस्वकृतशास्त्रे वयं दूषिता भवामस्तदा तस्य नाऽऽगो मनागपि स्यात्, परं केवलं तस्य मतानुराग एव, दृष्टिरागी तु न धर्मभागी, यदार्षे–''रत्तो दुट्ठो मूढो, पुव्विं वुग्गाहिओ य चत्तारि। एए धम्माण-रिहा, अरिहो पुण होइ मज्झत्थो ।१।'' इति, प्रत्युत आचारप्रदीपकाररत्नशेखरसूरिणा युष्मत्पूर्वजेन (मुद्रिताचारप्रदीपे ११ पत्रे) काल-वेलाप्ररूपणाधिकारे ''आचरणया तु रात्रौ द्वे कालवेले–मध्यरात्रे रात्र्यन्ते च, दिनेऽपि द्वे–मध्यान्हे दिनान्ते च, खरतरश्रीजिनदत्तसूरिकृते सन्देहदोलावलीसूत्रेऽप्येवमुक्तं 'चउ पोरिसिओ दिवसो, दिणमज्झंऽते य दुन्नि घडिआओ। एवं रयणी मज्झे, अंतम्मि अ ताव चत्तारि।१।''



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि वदता खरतरश्रीजिनदत्तसूरीणामेवं बहुमानो दत्तः, ततः गुरुशिष्ययोरुभयोरपि प्रदीपकारयोः कः प्रशंसास्पदं ?, शिष्येण गुरुवाक्यमपि श्रुतवरं वा भविष्यति, तथा "व्याख्याताऽभयदेवसूरिरमलप्रज्ञो नवांग्याः पुनः, भव्यानां जिनदत्तसूरिरददाद्दीक्षां सहस्रस्य तु। प्रौढिं श्रीजिनवल्लभो गुरुरधाद् ज्ञानादिलक्ष्म्या पुनः, ग्रन्थान् श्रीतिलकश्चकार विविधांश्चन्द्रप्रभाचार्यवत् ।१।" इति श्रीमुनिसुन्दरसूरय-स्त्रिदशतरङ्गिण्यां, तथा "पुरा श्रीपत्तने राज्यं, कुर्वाणे भीमभूपतौ। अभूवन् भूतले ख्याताः, श्रीजिनेश्वरसूरयः ।१। सूरयोऽभयदेवाख्या-स्तेषां पट्टे दिदीपिरे। येभ्यः प्रतिष्ठामापन्नो, गच्छः खरताभिधः ।२।" इति तपासोमसुंदरसूरिक्रमकमलमरालमहोपाध्यायश्रीचारित्ररत्न-गणितद्विनेय पं० सोमधर्मगणिविरचितायां उपदेशसप्ततिकायां युष्मत्प्राचः (पूर्वजः), तथा "खरतरपक्षे श्रीनवाङ्गीवृत्तिकारकाः श्रीअभयदेव-सूरयस्तच्छिष्याश्चारित्रिणोऽनेकग्रन्थकर्त्तारः श्रीजिनवल्लभसूरय इत्यनुक्रमेण सातिशयाः सूरिवराः बभूवुः" एवंप्रकारो वार्त्तिकः कल्पान्तर्वाच्ये तपागच्छीयश्रीहेमहंससूरयः। तथा "वत्सरैर्द्वादशशतै-श्चतुर्भिरधिकैर्गतैः। भावी विक्रमतो गच्छः, ख्यातः (खरतरगच्छशाखा—रुद्रपल्लीय) खरताख्यया ।१।" इति दीपालिकाकल्पे तपाश्रीजिनसुन्दरसूरयः, एवञ्चैतेषु भवत्पूर्वजेष्वेकोऽस्मद्गुरुगुणोक्तिमपरः खरतरगच्छप्रतिष्ठा मन्यः खरतरगच्छीयाचार्याणां सातिशयत्वमन्योऽस्मद्गच्छस्य ख्यातिं प्राह, नावर्णवादं, गुरुतत्त्वप्रदीपकारस्त्वेवं (पूर्वोक्तं) वक्तीति, एवमेकस्मिन्नेव गच्छे सर्वेऽस्मद्गणप्रशंसामुक्तवन्त, अयं त्वविराधितो विराधितो वा निन्दक इति सतां चेतसि वैरुध्यं विधत्ते, परं मतानुरागरक्तः स इति न प्रतीतिपात्रं, तदप्रतीतौ तद्वाक्यमपि नोपादेयं, भ्रान्तविप्रलम्भकवाक्यवत्, अपरश्च स तदानीन्तनैः साम्भोगिकैः समनोज्ञै र-साम्भोगिकैः सत्तीर्थ्यैश्च शिक्षितोऽपि भविष्यति परं केनाप्युत्कटद्वेषानुगतत्वादिहेतुनाऽभिनिवेशावेशमेव प्राप्तो ग्रन्थं गुरुतत्त्वप्रदीपमार-चितवान्, मोक्षार्थिभिर्गच्छवासिभिरेकगच्छनिवासित्वदाक्षिण्यादेः स उपेक्षितः, पुनः कालान्तरे भवद्भिर्गच्छान्तरद्वेषिभिस्तत्प्रायैः कुतश्चित्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रन्थमुपलभ्य पुनस्स प्रकटित इति तत्त्वं सम्भावयामः, अत एव महिसाणापुरे पत्तने च बृहत्खरतरगच्छेश्वरश्रीजिनचन्द्रसूरिभिः सह पूर्वोत्तरपक्षपरिग्रहपूर्वकं केवलद्वेषमूलतामेव विभाव्य पूर्वाचार्यप्रणितग्रन्थैः सह गच्छान्तरीयैश्च सह विरोधनिरोधाय तपागच्छाधीशश्रीविजयदानसूरिणा उत्सूत्रकन्दकुद्दालेत्यपराभिधानो गुरुतत्त्वप्रदीपग्रन्थो जलशरणमकारि, एतत्संवादार्थिना हीरविजयसूरिलिखितद्वादशप्रश्नोत्तरपत्रमन्वेष्यं, एवं मतानुरागीणामन्येषामपि कियन्ति विरुद्धोक्तानि विभाव्यन्ते ?, साम्प्रतमपि तत्सन्तानीयेन केनचित्तपोवद्गच्छान्तर्गतेन सर्वगच्छद्विषा[1] प्रागेवं न्य(प्रा)रूपि—यत्तपोवद्गच्छव्यतिरिक्तयतिप्रतिष्ठिताः जिनप्रतिमाः वन्दनाऽनर्हा इति, ततस्स कैश्चित्साम्भोगिकैः सत्कृतोऽपि गच्छाधीशन्यकृतः[2] जनैर्धिकृतो[3] यद्यपि मौनमाश्रितवान्, परं तदा तेन तत्स्वरूपनिरूपको यो ग्रन्थाभासः कृतो भविष्यति सोऽपि कालान्तरे तत्स्वरूपाज्ञातॄणां तद्गच्छीयानां तथैव गच्छव्यवस्थाभ्रममाविष्करिष्यति, यथा वा श्रीठाणावृत्तौ "तव्वसेण य पक्खियाईणि वि चउद्दसीए आयरियाणि, अन्नहा आगमुत्ताणि पुण्णिमाए" इति चिरन्तनप्रतिपाठे विद्यमाने (तथा) विचारामृतग्रन्थे श्रीकुलमण्डनाचार्येण सम्यक्तथैव निर्णीतेऽपि १६३० वर्षे चतुर्मासकत्रयातिरिक्तपूर्णमासीनामनाराध्यत्वप्ररूपणाय चतुर्दश्यामागमाभिप्रायतः पाक्षिकत्वस्थापनाय च "चाउम्मासियाणि चउद्दसीए आयरियाणी"ति पाठः प्रतिमात्रेऽप्यदृष्टः साक्षात्केनचित्प्रवर्त्तितः, ततः सोऽप्यपपाठः कालान्तरे पाठपरावृत्तिस्वरूपमजानानां जनानां पाठभ्रमं जनयिष्यतीति, एवं सर्वमपि स्वमता(स्वमत्य)नुसारिजिनाज्ञाभङ्गकारिजन-

१ अग्राह्याभिधानत्वाद्ग्रन्थकारैरनिर्दिष्टनाम्ना धर्मसागरेण। २ श्रीहीरविजयसूरिभिर्द्वादशजल्पपट्टकं प्रकाश्य सङ्घाद्बहिष्कृतः। ३ श्रीयशोविजयोपाध्यायैः प्रतिमाशतके तथा वृत्तिकृता लघुवृत्तौ "पर-अन्यगच्छीयजिनार्चा-प्रतिमाविषये द्वेषस्त्याज्यः" इति ७१ काव्यवृत्तौ, तथा "इच्छाकल्पितं यद्दूषणं अन्यगच्छीयत्वादिकं तेन कृत्वा बहुभिरंशैर्लुम्पकतां समाश्रितं" इति ७२ काव्यवृत्तौ, तथैव च "पार्श्वस्थस्तु भवान् अर्थशून्यो धर्मसागरः पार्श्वस्थमध्यवर्त्ती" इति ७७ काव्यवृत्तौ, इत्यादिना बहुशस्तिरस्कृतः, विशेषजिज्ञासुभिर्विलोक्याः प्रतिमाशतकबृहद्वृत्तिस्वोपज्ञधर्मपरीक्षावृत्तिषट्त्रिंशज्जल्पविचारकुमताहिविषजाङ्गुल्यादयो ग्रन्थाः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विजृम्भितमिदमिति दिङ्मात्रं, अलं प्रसङ्गेनाथ प्रकृतं प्रस्तुमः ।२९। अथ स्वमतिकृतनव्यार्थानां निरतिशयानामनर्थं विभावयन्नाह-

**सीसम्मि अकाऊणं, अत्थस्स परूवगं गुरुं गीयं । जो परिकप्पइ अत्थं, सो साइसयो व सच्छंदो ।३०।**

व्याख्या—'अर्थस्य प्ररूपकं' अर्थप्रकाशकं शिरसि अकृत्वा 'गीतं' गीतार्थं 'गुरुं' तत्त्वोपदेष्टारं यः स्वमत्या 'अर्थं' आगमार्थं परिकल्पयति स 'सातिशयो' विशिष्टज्ञानवानात्माऽऽगमादिः 'वा' अथवा 'स्वच्छन्दः' स्वेच्छाचारी-सर्वापशदः सम्यक्त्वादिगुणविकलो ज्ञेय, एतावता यो यमाग्रही परम्परायातमर्थं विमुच्य स्वमत्या प्रज्ञावलेपावलिप्तचित्तो नव्यमर्थं प्ररूपयति स स्वच्छन्दो विज्ञेयो, न तु सातिशयो, जातिस्मृति-विशिष्टश्रुतकेवलाद्यतिशयाभावात्, तदभावत्वं तु साम्प्रतमुभयवादिसिद्धमेव, कदाग्रह एवात्र निबन्धनमिति, आग्रहिकअनाग्रहिकयोरयं विशेषः, तथा चाहुः पूज्यपादाः "आग्रही बत निनीषति, युक्तिस्तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु, युक्तिर्यत्र तत्र मतिरेति निवेशम् ।१।" इत्यार्षमाकलय्य नव्यार्थप्ररूपणां परिहर, गीतार्थाचरणामाचरेति शिष्टोक्तिः।३०।अथ गीतार्थाचरिताया आचरणाया अपि प्रामाण्यं समर्थयन्नाह-

**लाभविसेसं जाणिय, रागदोसाइदोसनिरविक्खा । किंचिवि समायरंता, गीया आराहगा णेया ।३१।**

व्याख्या-'गीता' इति गीतार्थाः 'किञ्चित्' कृत्यविशेषं 'अपि' एवकारार्थः, स पुरस्सम्बध्यते, 'समाचरन्तः' सम्यग्यतनया आचरन्तः समाचरन्तः, सूक्ष्मेक्षिकया किञ्चित्कुर्वन्तोऽपि आराधकाः ज्ञेयाः, एवकारेण ज्ञानदर्शनचारित्राणां जिनाज्ञायाश्चेति योज्यं, किं कृत्वा ?, 'लाभविशेषं विज्ञाय' एकस्मात्सामान्यलाभादन्यो विशिष्टो लाभो लाभविशेषस्तं विज्ञाय-विशिष्टज्ञानेन विषयीकृत्य, किं विशिष्टाः गीतार्थाः ?, 'रागद्वेषादिदोषनिरपेक्षाः' रागश्च द्वेषश्च रागद्वेषौ, तावादौ येषां ते रागद्वेषादयस्ते च ते दोषाश्च रागद्वेषादिदोषास्तेषु निर्गता अपेक्षा येषां ते रागद्वेषादिदोषनिरपेक्षा, एवम्भूताः गीतार्थाः किञ्चित्समाचरन्तोऽप्याराधका इति भावार्थः, एतावता च शुद्धमेधाजितसुरसूरिभिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीजिनदत्तसूरिभिर्यज्जिनप्रतिमानां पूजा स्त्रीषु निषिद्धाऽस्ति तद्दुष्टमित्युक्तं प्रत्युक्तं द्रष्टव्यं, न हि तैः सर्वासां स्त्रीणां सर्वप्रकारैः सर्वजिनप्रतिमासु पूजा निषिद्धा, तथा च तद्वचः "मूलपडिमं सुइभूइवि छिवइ न सावियइ" इति चर्चरीप्रकरणे, तथा "पूएइ मूलपडिमं पि, साविया चियनिवासिसम्मतं"[१] इत्युत्सूत्रपदोद्घाटनकुलके, अपरं "तं पुण सपाडिहेरं, अपाडिहेरं च मूलजिणबिंबं। पूइज्जइ पुरिसेहिं,

१ एतद्विषये सागरमतोत्पत्तौ जीर्णपत्रे च एवमस्ति तपोष्ट्रिकापरपर्यायस्य तापसमतस्योत्पत्तिर्यथा—एकः कश्चिज्जगच्चन्द्रनामा स्तम्भनपोशालचैत्यवासिश्रीमणिरत्नसूरिशिष्यः कुतश्चिन्निमित्तात्सञ्जातकोपः स्वकीयगुरुपार्श्वान्निर्गतः सन्नवीनविधिनाम्न्या निजमतिकल्पितसामाचार्या कतिचिज्जनात्मकं समुदायं स्वायत्तीकृत्य स वेषधारी जगच्चन्द्राचार्यीभूय प्रवर्त्तमानः स्वाङ्गीकृतमतवृद्धये उच्छिष्टचाण्डालिकाऽऽराधनावाप्तचाण्डालिकसंज्ञकः कियता कालेन पत्तने समागतः, अन्यदा च तेन जिनालयं गतेन रुधिरं पतितं दृष्ट्वा अहो !! न अपावित्र्यभाजनं स्त्रिय इति विचिन्त्य पूजां कुर्वती ऋतुवती भवन्ती स्त्री अधिष्ठायकेन चमत्कारिकाणां श्रीजिनशासनोन्नतिकारिकाणां श्रीजिनप्रतिमानां पूजाकर्त्तुं योग्या इति प्ररूपितं, तथा प्ररूपणाव्यतिकरं च विज्ञाय पत्तनस्थश्रीसङ्घेन भणितं-अहो !! श्रीजिनशासनोन्नतिनाशकं प्रवचनोपघातकमेतद्वचनं ब्रुवाणो जगच्चन्द्राचार्यः प्रातः शिक्षणीयः, यदि सङ्घेन ताडितः सन्स्वकीयं कदाग्रहं न त्यक्ष्यति तदा तिरस्कृत्य राकारक्तवद्बहिः कर्षयिष्यते, इत्येवं सङ्घविचारणां श्रुत्वा भीतः सन् संवत् १२८५ वर्षे उष्ट्रिकावाहनारूढो नंष्ट्वा स्तम्भनपुरे गतः, तत्रत्यजनैरूचे कथं भवान् स्तोकेनैव कालेनात्रायातः ?, तदानीं तेनोक्तं—पत्तने कश्चिदुपद्रवं सम्भाव्य औष्ट्रिकीं विद्यां स्मृत्वाऽत्राऽऽयातोऽहं, तदानीं जने औष्ट्रिक इति नाम्ना रूढिर्जाता, तन्नामश्रवणेन सञ्जातकोपो जगच्चन्द्राचार्यः परुषवचनैर्जनेन सह राटिं कुर्वाणस्तापप्रकृतिकत्वादहो !!, अयं तपोष्ट्रिको दृश्यते इति जनैर्द्वितीयं तपोष्ट्रिक नाम दत्तं, परं कियत्कालानन्तरं तदपत्यैर्वयं तपेन तपा इति कृत्वा जनैस्तपा इत्याख्यायते इत्यर्थान्तरं निजचित्ततुष्टये नाम्नोऽर्थं पृच्छतां जनानां प्रत्युत्तराय च विकल्प्यानभिमतमप्यभिमतीकृतं, यतः संवत् १३०० प्राक्तनेषु ग्रन्थेषु क्वापि नास्ति एतत्, यदुत सं० १२८५ वर्षे अमुकनगरे अमुकनाम्ना राज्ञा वा अमुकनाम्न्या राज्या श्रीजगच्चन्द्रसूरेर्द्वादशवर्षाणि यावत् आचाम्लतपः दृष्ट्वा तपागच्छबिरुदं दत्तं, इति तात्कालिनग्रन्थेषु तद्गन्धोऽपि नास्ति, प्रत्युत देवेन्द्राचार्यप्रभृतिभिः कतिचिद्भिस्तु स्वकृतधर्मरत्नप्रकरणवृत्त्यादिषु चैत्रवालकगच्छ एव स्पष्टतयोल्लिखितः, परं पूर्ववृत्तान्तयुतं तपागच्छबिरुदं प्राप्तं न लिखितं, तदनुजैस्तु कियद्भिस्तु स्वाभिनिवेशेन अनाभोगेन वा लिखितमपीति तपामतोत्पत्तिः। तथा एवमपि दृश्यते "कलिकाले समुद्भूतो, धर्मसागरनिन्हवः। तपोष्ट्रिकमतस्तस्मात्, समुद्भूतः कदाग्रहात् ।१।" धर्मसागरेण स्वोपज्ञईर्यापथिकीषट्त्रिंशिकायां खरतरमतोत्पत्तिर्यथाऽलेखि तथैव तपामतोत्पत्तिः पुण्यसागरेणालेखि, अतो दोषस्तस्य एव ज्ञेयः, यद्रागद्वेषरहितं युक्तं च तत्प्रमाणं ज्ञेयमिति, एवमेव प्रख्खरात्मजानन्दस्य निन्हवत्वस्थापनावादयुतो मूलपुरुषवादोऽपि ज्ञेयः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न इत्थियाए असुइभावा ।१।” इत्यष्टादशगाथाप्रमितपूर्वाचार्यकृतविधिविचारसारकुलकेऽपि पूर्वाचार्या अपि तथैवोक्तवन्तः, न हि तेषां गुरूणां जिनपूजां कुर्वाणाः स्त्रियः स्नानादिकृत्येन शीतकाले मा भूवन् दुःखिता इति स्त्रीषु रागोऽङ्गपूजामात्रनिषेधकारणं, उष्णकाले स्नानादिना सुखस्यापि तासु सम्भवात्, यदि शीतकाले एव तासां जिनपूजा तैर्निषिद्धा भवेत्तदा रागमूलकत्वमपि तन्निषेधे भवेत्, मौलप्रसिद्धप्रतिमाव्यतिरिक्तानां जिनप्रतिमानां पूजायास्तासु साक्षादेवानिषेधान्मौलजिनप्रतिकृतिपूजायाः निषेधाच्च, नापि जिनप्रतिमासु द्वेषात्तैः स्त्रीणां पूजा निषिद्धा, स्थाने स्थाने विधिचैत्ये विधिपूजायास्तैः प्रशंसितत्वात्, अविधिपूजाप्रतिषेधे त्वविधावेव विद्वेषः, तद्द्वेषस्य न्याय्यत्वेन नोक्तदोषः, नापि स्त्रीषु जिनपूजाजनितफलं माऽभूदिति द्वेषाद्वा पूजा निषिद्धा, सुगन्धिधूपाक्षतकुसुमप्रकरदीपनैवेद्यफलजल-गीतनाट्यवाद्यादिविधिपूजानां तास्वनिषेधात्, न च मालिन्यवद्वनिताजनितसंस्पर्शादधिष्ठायकापगमो माऽभूदिति जिनप्रतिमासु रागान्नि-षिद्धेति प्रतिबन्दी दोषावहा, इष्टापत्तेः तद्रागस्य गुणकारणत्वात्, यदाहुः “अरहंतेसु अ रागो, रागो साहूसु बंभयारीसु। एस पसत्थो रागो, अन्नत्थ रागो ण साहूणं ।१।” तत एव गुरूणां वेगविघातजनितार्त्तिनिवृत्त्यै रागाद्वन्दनादेरपि निषेधस्यागममूलकत्वमप्यभ्यूह्यमिति, तथा च सातिशयमौलजिनप्रतिमानां जिनशासनोन्नतिकारिकाणामकालसमुद्भूतमालिन्यभावेन दूषितायाः योषितः करस्पर्शेनाधिष्ठायक-देवताऽपगमो माऽभूदिति लाभविशेषमाकलय्य सातिशयमौलजिनप्रतिमासु तासां स्पर्शेन तैः पूजा निषिद्धेति सिद्धं, तस्याश्चाधिष्ठातृ-देवताऽपगमे च विशिष्टपूजाऽयोगान्न भविकानां जिनप्रतिमादर्शनेऽपि विशिष्टा निर्जरा म्लेच्छादिभिर्भङ्गसम्भवाच्च, सातिशयप्रतिमायाः जिनशासनोन्नतिकारकत्वं सिद्धमेव, प्रतिमापूजाकर्तॄणां स्त्रीणां यद्यपि लाभोऽस्त्येव परं प्रतिमातोऽधिष्ठायकापगमे वांछितैहिकार्थपूर्त्ते-र्जैनास्थापूजाऽपगमेनालाभस्य बहुत्वं स्यात्, बहु व्ययपरिहारार्थमल्पलाभपरिहारस्यापि प्रवृत्त्यङ्गत्वात्, तेन लाभालाभविशेषविभावन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुरस्सरेयमाचार्याणामाचरणा स्वगच्छे वर्त्तमाना केन बाध्या ?, प्रत्युत सद्भिराराध्या[1], ननु सकृदेवैवंभूताशातनायां दैवादाविर्भवन्त्यां प्रतिमाभङ्गेऽभिनवनिर्मापणमिवैवंप्रायाणां स्त्रीणां प्रायश्चित्तेन दत्तेन प्रायश्चित्तशुद्धिमाधाय भवद्भिः पुनस्ताभ्यस्तत्पूजनं विशेषतो विधापनीयं, यत्तु एकस्यास्तथाभूतापराधे तज्जातीयानां सार्वासां सर्वथा तन्निषेधविधानं तद्विपरीततापरीतमेवेति चेन्न, प्रतिगणं दृश्यमानानामेकस्य मन्तुमात्रमादाय दोषप्रवृत्तिनिवृत्त्यै सर्वथैव तन्निवारणतया समाचीर्णानां वाच्यानां सर्वथा निषेधापत्तेः, तथा च तद्गतमपि निषेध्यत्वं, तथा चात्यन्तमासमञ्जस्यं स्यात्, कियन्ति च तानि वाच्यानि वोच्यन्ते ?, दिङ्मात्रदर्शननिर्बन्धे तु श्रीज्ञाताङ्गे द्रौपद्यधिकारे "मत्थए अंजलिं कट्टु एवं वयासि–नमुत्थुण"मित्यादिपाठे सत्यपि "एतावता शक्रस्तवपाठादावप्यासां शिरस्यञ्जलिन्यासो न युज्यते, तथा करणे हृदादिदर्शनप्रसक्ते"रिति सङ्घाचारभाष्यवृत्तिवाक्यात्कस्याश्चित्स्त्रियाः प्रमाददोषाच्छक्रस्तवपाठादौ गोप्याङ्गदर्शनेऽपि तज्जातीयानां सर्वासामपि तन्निषेधनं भवत्पित्राऽपि समाश्रितं, भवदुक्त्या तद्ग्रन्थस्य देवेन्द्राचार्याणामाज्ञामवाप्य कृतत्वेन तत्प्ररूपणायाः देवेन्द्राचार्या एव मूलं, तथा च तेषां सिद्धान्तविरुद्धस्य सकलान्यगच्छसत्कगीतार्थसम्मतस्य शक्रस्तवपाठप्रसिद्धमुद्राभङ्गस्य प्रकटनेन महाप्रायश्चित्तापत्तौ भवता का गतिरनुसरणीया ?, 'इतस्तटीतो व्याघ्र'इति तव सङ्कटप्रकटनं,[2] तस्मादङ्गीकुरु जैनदत्तीं तदाचरणां परिहर वा स्वगुरुगच्छ-

---

१ अतोऽप्यधिकतरा आचरणा स्त्रीणां संयमनिषेधरूपा तपोगच्छीयैरेवप्रवर्त्तिता, सा तु अहमदावादस्थ शा. बालाभाइ कक्कलभाइद्वारा सम्पादितसंविग्नसाधुयोग्यनियमसङ्ग्रहपुस्तिकायां १६७७ वर्षे विजयदेवसूरिणा स्वप्रकाशिते साधुमर्यादापट्टके त्रयस्त्रिंशत्तमा मर्यादा यथा–"मुख्य वृत्तिए हमणां श्राविकाने दीक्षा न देवी, खास जरूर लागे तो पण ३५ वर्षनी अंदरनी वयवालीने न देवी, उपरांत वय (उमर) होय तो देवी, तेमां तेने वेष पात्रादिक लाववानी शक्ति न होय तो सर्वथा न देवी" इत्यनेन मुख्यवृत्त्या सर्वासां स्त्रीणां प्रव्रज्यादानं सर्वथा निषिद्धं विजयदेवेन, अतो निन्हवत्वं व्यवस्थितं, तथाऽद्यतनैः प्रखरिकात्मजनिन्हवानन्द्याद्यैः कैश्चित्तपोगच्छीयैस्तासां गुरुवन्दनमपि निषिद्धं, एतत्सर्वं कथमुत्सूत्रतां निन्हवतां च न व्यनक्ति ?।

२ दृश्यन्ते च–यथा केचिच्छरीरे क्षतस्फोटकादिनाऽकस्माद्रसीरुधिरनिस्सरणभयेन जिनप्रतिमाऽङ्गपूजां न कुर्वन्ति तथैव अकालसमुद्भूतऋतुमालिन्यभयेन ता अपि पूजां न कुर्वन्ति।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवस्थां, सेयं दुरुत्तरा प्रतिबन्दितरङ्गिणी, भवतस्त्वन्धगजन्यायसत्यीकारस्य स्वस्वरूपं भवद्विधा एवावगच्छन्ति, तत्र च वस्तुवृत्त्या-ऽनन्यगत्या भुजङ्गगतिन्यायेनान्ततो गत्वा लाभालाभगवेषणैव भवता समाश्रयणीयेति, तस्मात् "कृतश्च शीलविध्वंसो, न चानङ्गः शमं गतः" इति न्यायादसमञ्जसमप्युक्तं कार्यमप्येतन्न सिद्धमिद्धमित्युक्तिलेशः, प्रयोगश्चात्र–इयमाचरणा प्रमाणं, अथ प्रशस्तरागद्वेषाविषयत्वे सति लाभविशेषविषयत्वात्, चतुर्थ्यां पर्युषणाचरणावत्, इत्यलं प्रासङ्गिकोक्तेन, प्रकृतमेवोच्यते-तथा च वयमागमपद्धतिप्रवृत्तसुविहितसंविग्नप्राक्तन-सूरिपरम्परानुगतत्वादागमं परम्पराञ्चेति द्वयमप्याराधयन्तः परिधान(अधोवस्त्र)परिधानपूर्वकं कटीदवरकं दढयन्तो जना इव नोपहसतिपात्रं, भवाँस्तु शुद्धागमप्रधानश्रीयुगप्रधानसूरिस्वगुरुपरम्परायाः पराङ्मुखत्वात्तदुभयभ्रष्टाः, ततो विपरीतव्यूतैकसूत्रपाठमात्रसूत्रतन्तुघटितकटी-सूत्रसद्भावेऽपि परम्परारूपवरासि(स्थूलवस्त्र)परिहितेरभावाद् भवदुक्ता शोभा(भवतां विनीता–सुन्दरा)स्वकल्पितार्थप्ररूपणान्न भविष्यतीति कण्टकोद्धार इति गाथार्थः।३१। एवं सकलगीतार्थानामत्रैकवाक्यतां निश्चित्याधुनिककल्पितपरम्परायाश्च निर्मूलत्वेन परम्पराभासतां संसूच्य पारम्परिकार्थपरिहारेण स्वमतसिद्ध्यै नव्यार्थकारिणं (निन्दयन्) निदर्शयन्नाह–

**जो समयसाहणऽट्ठं, सीसाणहियऽट्ठया य निरवेक्खो। भिंदइ सिद्धंतऽत्थं, सो तेसिं अप्पणो अहिओ।३२।**

व्याख्या–'यो'ऽनिर्दिष्टनामाऽग्राह्याभिधानत्वेन वा यदिति कर्तृनिर्देशः 'सिद्धान्तार्थं' सिद्धान्तस्य–पूर्वाचार्यलिखितशास्त्रस्य योऽर्थो गुरुपरम्पराऽऽयातानुयोगः सिद्धान्तार्थस्तं 'भिनत्ति' विदारयति स'तेषां'प्रस्तावाच्छिष्याणामात्मनश्च अहितः स्यादित्यन्वयः, किम्भूतो यः?, 'निरपेक्षः' निर्गता अपेक्षा शास्त्रान्तराणां गुर्वाम्नायस्य वा यस्मात्स निरपेक्षः, किमिति तमर्थं भिनत्ति? इत्याह–'स्वमतसाधनार्थं' स्वकीयं मतं स्वमतं, तस्य यत्साधनं–यथा तथा शास्त्रं निरपेक्ष्य स्वकपोलकल्पितयुक्तिभिर्निष्ठाप्रापणं तदर्थं–स्वमतसाधनार्थं 'च' पुनः'शिष्याणां'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदन्तेवासिनां भविष्यत्कालभाविनां 'हितार्थं' हिताय, अयं भावः–स स्वयमात्मना पण्डिताभिमानी सदाऽभिमानी स्वशिक्षितशिष्यप्रशिष्यपरिषन्मध्यवर्त्ती विद्वच्चक्रवर्त्तिनमिवात्मानं कलयन्स गृहेनर्दी यथा तथाऽर्थं कल्पयन्नपि स्वशिष्यप्रशिष्याणामसमर्थार्थकल्पनया तथाविधानर्थनिर्व्यूहासमर्थत्वेन विचारचञ्चुभिर्विवेचकैः सप्रपञ्चं साक्षेपपरिहारमुक्तानां युक्तिमुक्तानां 'अहितः' शत्रुभूतः, भावत उन्मार्गप्ररूपणाद्द्रव्यतस्तदुत्तरदानासमर्थत्वेन तेषां मानम्लानिकारित्वात् 'आत्मनः' स्वस्याहितत्वं तत्त्ववृत्त्याऽनन्तसंसारपारावारसंसरणकारणस्योत्सूत्रस्य प्ररूपकत्वादर्थान्तरन्यासः, यः 'समयसाधनार्थं' समयस्य–सिद्धान्तस्य सूत्रान्तरवाक्यश्रवणसञ्जातव्यामोहमोहितमतिकपल्लवग्राहिजनविसंवादितार्थस्य यत्साधनं–सम्यगनवगतसूत्रपरमार्थप्ररूपणया निष्ठाप्रापणं–विसंवादविद्ध्वंसनमिति यावत्तदर्थं–तन्निमित्तं समयसाधनार्थं 'सिद्धान्तार्थं' विसंवादबीजभूतागमपदार्थं 'भिनत्ति' विवेचयति निर्युक्त्यादिप्रयुक्तविधिना, किमर्थं ? 'शिष्याणां' सम्यगुत्थानेनोत्थितानां शुश्रूषूणां 'हितार्थं' मनुग्रहार्थं, मा सिद्धान्तविपरीतार्थप्ररूपणेन दुर्लभबोधित्वमनन्तसंसारिकत्वमेते प्राप्नुयुरिति हितहेतुत्वं, किम्भूतो यः ? 'निरपेक्षो' निर्गता अपेक्षा शिष्येभ्योऽर्थशुश्रूषेभ्यो वस्त्रान्नपानादेरादित्सादिरूपा यस्मात्स निरपेक्षः, सापेक्षो हि सम्यगपि व्याख्येयं व्याख्याति विपरीतमपि शिष्यचेतोऽनुवृत्त्या व्याकुरुते, सस्पृहत्वात्, ततो निरपेक्ष इति व्याकर्त्तुः विशेषणं, स 'तेषां' शिष्याणां च पुनरात्मनो हितः सन्मार्गप्ररूपकत्वेनात्मनो हितत्वं तत्त्ववृत्त्या शिष्याणामुन्मार्गनिवर्त्तकत्वेन च हितत्वं सुप्रतीतमेव, उभयथाऽपि दर्शनमोहनीयकर्मनिर्वर्त्तनविघातनेनात्महितत्वात्, शिष्याणामपि सांशयिकरूपतूर्यमिथ्यात्वापगमनेन शुद्धसम्यक्त्वलाभदातृत्वाद्धितत्वं समवसेयं, यथा श्रीज्ञाताङ्गे द्रौपद्याः सुकुमालिकाभवे विराधितश्रामण्याया अपीशानकल्पे उत्पत्तिं समवगच्छतः श्रीव्याख्याप्रज्ञप्तौ विराधितश्रामण्यस्य जघन्येन भवनपतिषूत्कर्षतः सौधर्मकल्पे इति गतिविसंवादं श्रुतिपथमासाद्य उभयशास्त्रविरोधेन व्याकुलितमतीन् शिष्यानुपलभ्य विराधकत्वे मूलगुणो-



For Private And Personal Use Only

त्तरगुणविषयविशेषं श्रीगुरुचरणा निजगदुः तद्यथा—सुकुमालिकाया उत्तरगुणविषया बकुशत्वमात्रकारिणी विराधनावस्त्वादीशाने उत्पाद इति, विशेषविराधनया तु सौधर्मे इति, अत्रेदमैदम्पर्यं—सामायिकाधिकारे प्रतिश्रुतं "पच्छा इरियावहियाए पडिकमइ" इत्यावश्यकवृत्त्यादि पदं "अपडिक्कंताए इरियावहियाए न कप्पइ चेव काउं किंचिवि चेइयवंदणसज्झायझाणाइयं" इत्यादि श्रीमहानिशीथपदेन केनचित्पल्लवग्राहिणा पल्लवकेनेव जनेन विसंवाद्यमानमधिगम्य तदुपेक्षापरिहारेण शिष्यव्युत्पत्तिप्रवृत्त्या विसंवादकाभासभूतपाश्चात्यपदस्याविवेकीजनचेतश्चमत्कारकारि शास्त्रान्तरविरोधि स्वबुद्धिबोध्यबुधजननिधिप्रतिनिधिसामान्यं प्रतिव्यक्तिवृत्तिरूपमर्थमपार्थीकृत्य सकलसमयवेदिसंवादिनं व्यक्तिविशेषविषयतयाऽर्थविशेषं परिकल्पयन्तो विद्वज्जनावष्टम्भाः पूर्वाचार्यास्तदनुयायिनश्चात्मनः शिष्याणां च हितपरा एवेति गाथार्थः ।३२। तदियता सामायिकाधिकारे 'ईर्यापथिकापदस्य' गमननिवृत्तिरूपनव्यार्थं निर्वर्त्तकस्य संयतापशदस्यात्मपराहितत्वरूपं फलमुपदर्श्य परपक्षविघटनापूर्वकं तदुक्तकण्टकोद्धारपुरस्कारेण स्वपक्षं निगमयन्नाह—

**तम्हा इरिआवहिआ, पुव्वायरिएहिं निव्विरोहेहिं । सामाइया उ पच्छा, कहिया लिहिआ य सद्दहिया ।३३।**

व्याख्या—'तस्मा'दिति निगमनवाक्यं, पूर्वोक्तयुक्तिलेशप्ररूपणादिहेतोः'पूर्वाचार्यैः' श्रीहरिभद्रसूरिश्रीअभयदेवसूरिश्रीयशोदेवसूरिश्रीविजयसिंहाचार्यश्रीयशोदेवोपाध्यायश्रीदेवगुप्तसूरिश्रीहेमाचार्यश्रीदेवेन्द्राचार्यादिभिः 'सामायिकात्'सामायिकदण्डकात् "करेमि भंते ! सामाइअं" इत्यादिपाठरूपात्'पश्चात्' अनन्तरं 'ईर्यापथिकी'श्रीमहानिशीथोक्तशुद्धिफलरूपा 'कथिता' "कथत्कवाक्यप्रबन्धे" इति धातुप्रयोगाद् वाक्यप्रबन्धतां प्रापिता-जनसमक्षमाक्षेपपरिहारादिना प्ररूपिता, ननु तेषामदृष्टत्वेन कथं तत्कथनमेवमवगतं ? तत्राह-'लिखिता'च' "लिखि अक्षरविन्यासे" इति प्रकृतिप्रयोगादक्षरविन्यासी कृता च, पूर्वजानां हि कथितं लिखितेनाऽनुमीयत एव, लौकिकानामपि देयोद्-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्राहणिकादिकं पूर्वजानामक्षरविन्यासेनैव निर्धार्यते, ततो लिखितेति युक्तमेवोक्तं, ननु तेषां कथनं लिखनश्च समधिगतमेव हेतुमद्भाव-सम्बन्धेन, लिखितस्य कथनाऽविनाभूतत्वात्, परं तेषां चेतसि तथा श्रद्धानं न भविष्यति ? अदित्सोर्वणिजः पत्रलिखितश्वस्तनदिनभणन न्यायेन, तत आह–'श्रद्धिता च' श्रद्धाविषयीकृता, "काकाक्षिगोलक"न्यायेन मध्यस्थः च शब्द उभयत्रापि सम्बध्यते, तथा च सतां करणत्रयेऽपि समानत्वं ध्वनितं, यदाहुः–"यथा चित्ते तथा वाचि, यथा वाचि तथा क्रिया। चित्ते वाचि क्रियायां च, साधूनामेकरूपता ।१।" इति कथितेत्यनेन वाचाम्प्रवृत्तिर्निर्दिष्टा, लिखितेत्यनेनाक्षरविन्यासस्य कायिकत्वात्कायिकप्रवृत्तिरपि समुपदिष्टा, श्रद्धितेत्यनेन श्रद्धानस्य मनोधर्मत्वान्मनः प्रवृत्तिः, एवं करणत्रयेऽप्येकतैवात्र तेषामिति गाथार्थः ।३३। अथ पूर्वाचार्यानुयायिनां फलमाह–

तं तह य सद्दहंता, परूवयंता य कारवेंता य। जिणचंदाणाणुगया, भविया निस्सेयं पावंति ।३४।

व्याख्या–'ता'मीर्यापथिकां चस्यैवार्थत्वा'त्तथैव' पूर्वाचार्यप्ररूपणानुगततया सामायिकदण्डकपाठादनु'श्रद्दधतः' श्रद्धाविषयीकुर्वन्तः 'प्ररूपयन्त' उपदिशन्तश्च पुनः कारयन्तोऽन्येभ्यश्चाकुर्वद्भ्यो 'जिनचन्द्राज्ञानुगता' जिनचन्द्राणां–'जिनेषु'सामान्यकेवलीषु चन्द्रेव ये ते जिनचन्द्रास्तीर्थङ्करा अर्हन्तस्तेषां गुरूणां वा श्रीजिनचन्द्रसूरीणां अनुगताः 'भविकाः' मुक्तिगमनयोग्या जीवा 'निःश्रेयां' सिद्धिं प्राप्नुवन्तीति गाथार्थः ।३४। तदियता नियतागमाधिगमनेन सदाचरणया च निश्चितं स्वाभिधेयमभिधाय साम्प्रतमेतत्प्रकरणसमर्थनार्थं गाथाद्वयमाह–

एवं लद्धजयाणं, जिणचंदगुरूण गुरुपमोयाणं। नह नीरहि रस ससहर, वरिसे लहिऊण उवएसं ।३५।

इरियावहिअसरूवं, दंसणसहियाण हियकरं लिहिअं। जयसोमेण सुविहिणा, सोहिंतु विउ पसन्नमणा ।३६। युग्मम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—'एव'मित्युक्तप्रकारेण ईर्यापथिकास्वरूपं विद्वांसः शोधयन्तु इत्यन्वयः, किम्भूताः विद्वांसः ? 'प्रसन्नमनसः' प्रसन्नं—मत्सरादि दोषादूषितं स्वच्छं मनश्चित्तं येषां ते प्रसन्नमनसः, रागद्वेषमत्सरेर्ष्यादिदोषदुष्टमानसा विद्वांसः शास्त्रं न सम्यक्तया शोधयन्ति विशुद्धिमत्त्वेन, अविद्वांसोऽपि शास्त्रावेत्तारो न शोधनसमर्थाः, ततो विद्वांसः प्रसन्नमनसश्चेति पदद्वयमपि युक्तिमदेव, किम्भूतमीर्यापथिका(स्वरूपं) विचारं ? नभो-नीरधि-रस-शशधर-वर्षे, अङ्कानां विपरीतगत्या गणनात् १६४०वर्षे जयसोमेन 'लिखितं' विततगम्भीरार्थसार्थसन्दर्भितान्यान्य-शास्त्रमध्यसङ्कलितमपि विनेयजनजिज्ञापयिषया विविच्य लिपिसात्कृतं, न तु स्वकपोलकल्पनया नवीनं कृतमिति भावः, किं कृत्वा ? 'जिनचन्द्रगुरूणां' श्रीमद्बृहत्खरतरगणनायकानां श्रीजिनमाणिक्यसूरिपट्टोदयाचलचूलिकासहस्रकरशोभाविधायकानां श्रीमज्जिनचन्द्रसूरि-गुरूणां 'उपदेशं' आज्ञामादेशमिति यावत् 'लब्ध्वा' प्राप्य, किम्भूतानां जिनचन्द्रगुरूणां ? 'लब्धजयानां' लब्धः—प्राप्तो जयो यैस्ते लब्धजयाः, साभिप्रायं विशेषणमिदं, तद्यथा—पुरा हि श्रीगुरवो जिनचन्द्रसूरयः सद्भूतप्रभूतभाग्यप्राग्भाराः गौर्जरत्रायै कृतविहाराः श्रीमदणहिलपुरपत्तने कृतवर्षाचतुर्मासास्तपाधर्मसागरपाठकेन सह श्रीनवाङ्गवृत्तिकारकश्रीमदभयदेवाचार्याः खरतरगच्छाधीश्वरा उतान्य-गच्छीयाः वा ? इति विमर्शे जायमाने सकलजैनदर्शनसमुदायाध्यक्षं समस्तान्यान्यगच्छीयोपासकराशिसमक्षं तद्वास्तव्यसकलगच्छीया-चार्योपाध्यायवाचनाचार्यपण्डितशिष्यादिसुविहितजैनदर्शनेन नाना शास्त्राणि विचार्य विपरीतवादिनं दर्शनादपसार्य श्रीजिनचन्द्रसूरीणां सन्मानदानपूर्वकं श्रीनवाङ्गवृत्तिकारकश्रीअभयदेवसूरिः खरतरगच्छीय एवेति निर्धार्य सर्वजैनगच्छसम्मततया स्वस्वनामसन्दर्भितस्वस्वगच्छ-नामगर्भितसम्मतिपत्रदानेन कृतसुबहुमानाः समभूवन्निति लब्धजयत्वं तेषां, पुनः किम्भूतानां ? 'गुरुप्रमोदानां' गुरुः गुरुषु वा प्रमोदो-हर्षो येषां ते गुरुप्रमोदास्तेषां, यत एव लब्धजया अत एव गुरुप्रमोदाः, अथवा 'गुरुप्रमोदानां' श्रीप्रमोदमाणिक्यगुरूणामुपदेशं लब्ध्वा,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किम्भूतानां तेषां ? 'जिनचन्द्रगुरूणां' जिनचन्द्राः—श्रीजिनचन्द्रसूरिनामानः गुरवो येषां ते जिनचन्द्रगुरवस्तेषां, पुनः किम्भूतानां ? 'लब्धजयानां' लब्धः—प्राप्तः प्रस्तावाच्छिष्यतया जयो—जयसोमो यैस्ते लब्धजयास्तेषां, किम्भूतमीर्यापथिका(स्वरूपं)विचारं ? 'दर्शनसहितानां हितकरं' सम्यग्दर्शनयुतानां पथ्यान्नवद्धितदायकं, न तु दर्शनबाह्यानां, अन्यदपि लिखितं 'दर्शनसहितानां' लोचनयुतानामेव हितकरं स्यादिति गाथाद्वयार्थः।३५—३६। तथाच समर्थितमीर्यापथिकीषट्त्रिंशिकाप्रकरणं। जीर्णप्रतिद्वयेऽपि १६ गाथावृत्तौ १७ अङ्केन ३६ अङ्काः।

ग्रन्थकृत्प्रशस्तिः—राजन्वति श्रीजिनचन्द्रसूरि—गच्छाधिराजैरिह राजगच्छे। प्रमोदमाणिक्यगणेर्विनेय-लेशेन साक्षाज्जयसोमनाम्ना।१। चन्द्राब्धिरसचन्द्रकला(१६४१)मिताब्दे, समर्थिता वृत्तिरियं सुखेन। श्रीपार्श्वनाथेष्टगुरुप्रसादा—न्न्यायाचिरं धीधनसाध्यमाना।२। युग्मम्। यदत्र किञ्चिन्मतिमान्द्यदोषात्, सिद्धान्तमार्गाद्विपरीतगत्या। विनिर्मितं तद्विबुधाः सुबुद्धया, मदाग्रहात्साधु विशोधयन्तु।३। ग्रथाग्र १०३५।

थुइ—नमो अरिहंतादिने. थापना थापी, त्रिविधे वांदी. साधु साखे जी। करेमि भंते! सामाइयं. सावज्जं, पाप जोगने पहेली. पच्चक्खे जी॥ पछी इरियावहिए. शुद्धि करीने, सज्झाय चैत्य. वंदन कीजे जी। आवश्यक टीकादि. महानिशीथमां, करो सुर सहाय. ए श्रद्धिजे जी॥१-४॥

थुइ—कल्याण ते श्रेय रूपे मानिया ए, माता बे कूखे महावीर तो। सर्व जिन जननी कूखे ए, आववुं कल्याण तिम धारतो॥ भांखी जिन पडिमा पूजा ए, ऋतुवंतो न पूजे देव तो। पूजती ऋतुवंती जे थाय ए, पूजे न ते प्रभाविक देव तो॥१—४॥

थुइ—श्रीजिन पडिमा पूजा भाँखी पण, ऋतुवंती नहीं पूजे नार जी। धन हाणी काया रोग इह भवे होवे, शासन मलिनता कारजी॥ जिन अंग पूजती ऋतुवंती थाय जे, करे देव प्रभाव निसार जी। ते स्त्री न पूजे देवाधिष्ठ मूल बिंब, जे शासन उन्नति कार जी॥१॥

थुइ—आव्या पूर्वनवाणुं आदिजिन, चोमासी अजित शांति कीधीजी। तीरथ आशातना प्रभाव नष्टकारी, ऋतुवंती पूजा निषेधीजी॥ चोमासे तलाटी देरे, जिन दर्शन पूजन, नर स्त्री केम निषेधुं जी। अढी कोश उंचा गिरि जावानुं, कल्पसूत्रे वीरे कीधुं जी॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भविकभावुकसङ्गमकारकं, सकलशास्त्रलताजलदायकम् । जलदवर्णधरं हरिणाङ्कितं, नमत पार्श्वजिनं तिमिरीस्थितम् ।१। प्रबल-मोहतमस्तपन[1]प्रभं, सुमतिचित्रशिखण्डिज[2]सन्निभम् । मदनपङ्ककदं सुगुणान्वितं, नमत० ।२। विदलिताशुभकर्ममतङ्गजं, प्रणमितेश्वर-मस्तपतङ्गजम् । नवकनिर्जरपङ्क्जपत्रितं, नमत० ।३। अधरकान्तिविनिर्जितविद्रुमं[3], शमधरं शिवमार्गवरद्रुमम् । हरिवराशनसंस्थित[4]मऽर्चितं, नमत० ।४। श्रीमत्पार्श्वजिनेन्द्रमिन्दुसदृशाऽऽस्यं तापपापापहं, ऐक्ष्वाकान्वयनिर्मलाम्बुधिनिशानाथं नमस्याम्यहम् । देवेन्द्राऽमरमौलिमौलि-शिखरश्रेणिप्रकाशिक्रमं, कल्याणं 'जयसोम'सेवकमुनेः श्रीपार्श्वकल्पद्रुमम् ।५। इति श्रीतिमिरीग्रामस्थपार्श्वनाथस्तवनम् ।

देववंदन देवेंद्रे कर्युं, श्रीवीर विप्रकुले जाण । गर्भ पुरुषोत्तम शक्रस्तवे, न गर्भ नीच अकल्याण ।१। आषाढि सुदि छट्ठे गर्भाधाने, सूरि हरिभद्रे कल्याण । अभयदेवसूरि श्रेयः कह्युं, न विप्रकुले अकल्याण ।२। न आवे आव्या गोत्र कर्मथी, श्री वीर ब्राह्मणी कूख । अवतरिया क्षत्रिकुंडे प्रभु, त्रिशला राणीनी कूख ।३। ते आसोज वदि तेरसे, मान्युं त्रिशलाए कल्याण । फल वीरे विप्र नीच कुलथी, ते किम कहूं अकल्याण ? ।४। इंद्रे भद्रबाहुए कह्युं ए, श्रेय कल्याण फल जे । निंद्य अकल्याणकभूत किम ?, अहो जिनचंद्र वीर ते ।५।

श्रीवीरस्तवन–नारे वीर ! नहीं मानुं रे, नहीं मानुं नहीं मानुं रे । नहीं मानुं तारुं अकल्याण, प्रभु गर्भकल्याण प्रमाण ।१। नारे वीर ! नहीं मानुं रे, किम मानुं किम मानुं रे ? । प्रभु ! अकल्याणकभूत, जे गर्भापहार तात !, नारे वीर !० ।२। आषाढि सुदी छट्ठी दिने रे, आव्या देवानंदा कूख रे । ते दिन गर्भाधाने कल्याण श्रेय, ए पंचाशक साख, नारे वीर !० ।३। आसोज वदी तेरस दिने रे, गर्भधारण त्रिशला कूख रे ! । इंद्रे श्रेय कल्याण माताए, मान्युं कल्पसूत्र मूल साख, नारे वीर !० ।४। जन्म दीक्षा केवल मोक्ष थयुं रे, कल्याण श्रेय छ ए जाण रे । अकल्याण गंध सूत्रे नहीं रे, जिनचंद्र वीर वखाण, नारे वीर !० ।५।

---

१ सूर्य । २ बृहस्पति । ३ प्रवालकं । ४ हरिवराशनः–सिंहासनस्तत्र स्थितं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





थुइ—कल्याण ते श्रेय रूपे मानिया ए, माता बे कूखे महावीर तो, सर्व जिन जननी कूखे ए. आववुं कल्याण तिम धार तो ॥ भांखी जिन पडिमा पूजा ए, ऋतुवंती न पूजे देव तो। जिन पूजती ऋतुवंती थाय ए, पूजे न ते प्रभाविक देव तो ॥?॥

स्तवन—चोमासुं सिद्धाचल करिये रे, मंदिर तलाटीये नित जइये रे। हांरे जिन दर्शनना द्वेषो न थइये, जातीडा! जिन दर्शन सुखकंदो रे। हांरे ए तो टाले भवनो फंदो, जातीडा! जिन दर्शन मत निंदो रे।१। अमे जयणाथी इहां जासुं रे, प्रभु आणा ते दिलमांहे धरसुं रे। हांरे तेथी आराधक अमे तरसुं, जातीडा! चोमासुं सिद्धाचल करिये रे, मं०जा०जि० ।२। अमे जिन दर्शनना रंगी रे, ढुंढकना नहिं अमे संगी रे। हांरे किम थइये जिन दर्शनना भंगी ?, जातीडा! चो०मं० ।३। वर्षाले गिरि मुनि जावे रे, कोश अढी श्रीवीर फरमावे रे। हांरे कल्पसूत्र विरुद्ध किम कहावे ?, जातीडा! चो०मं०।४। सिद्धगिरि जिनदर्शन सारुं रे, ए तो लागे मुझ मन प्यारुं रे। हांरे जिन दर्शने जिनचंद्र तारु, जातीडा! चो०मं० ।५।

(थुइ) श्रीसिद्धाचले, आदि जिन आव्या, पूर्व नवाणु वार जी। अजित शांति, चोमासुं कीधुं, गणधर मुनि परिवार जी ॥ दर्शन पूजन, भविजन कीधुं, देशना अमृत पीधुं जी। चोमासे तलाटी देरे, जिन दर्शन पूजन, नर स्त्री किम निषेधुं जी ? ॥१॥

श्रीजयसोममहोपाध्यायविरचितस्वोपज्ञवृत्तियुतं

## श्रीईर्यापथिकीषट्त्रिंशिकाप्रकरणं समाप्तम्

For Private And Personal Use Only